नं० ६२७-घ

महारुद्रयज्ञपद्धतिः (धर्मशास्त्रम्)

1-6=6

नं० ९२७-घ

पत्राणि ५२ (अपूर्णम्)

ली० संवत् १८६५

नं० ६२८-घ

महारुद्रयज्ञपद्धतिः (धर्मशास्त्रम्)

पत्राणि ५२ (२४ तः ५२ संख्या पर्यन्तं)

लि० संवत् १८६८ (अपूर्णम्)

निकामेनिकामेन इतिस्तं भद्र नेत्रं दधिकाव्णा स्तं चांक ऊँ ऋ पु ए: ० पतोयत: १

मंत्रदैवो॰ इत्यादिमंत्रैः॥ इतिषोडशास्तंभपूजनं॥ १६॥ ततो द्वारपूजा॥ प्रथमंपूर्वद्वारेगंतव्यं।तत्रपूर्वद्वा
रे अक्षतैः पूजयेत् ॐद्वारश्रियैनमः ॐऊर्ध्वदेहल्यैनमः अधःद्वारशाखयोः॥ ॐगणेशायनमः ॐस्कं
दायनमः द्वारेकलशद्वयंनिधाय तयोरुपरि गंगायैनमः ॐयमुनायैनमः इतिसंपूज्य अथदक्षिणद्वारे॥
तत्रकलशद्वयंनिधाय॥ ॐद्वारश्रियैनमः ऊर्द्ध्वदेहल्यैनमः अधः द्वारशाखयोः ॐ पुष्पदंतायनमः॥
ॐकपर्दिनेनमः कलशद्वयेगोदावर्यैनमः ॐकृष्णायै॰ इतिसंपूज्यपश्चिमद्वारेगंतव्यं॥ तत्रकलशद्वयंनि
धाय ॐद्वारेद्वारश्रियैनमः ॐ ऊर्ध्वदेहल्यैनमः अधः द्वारस्तंभयोः ॐनंदिनेनमः ॐचंडायनमः कल
शद्वये रेवायैनमः ॐताप्यै॰ इतिसंपूज्यउत्तरद्वारेगंतव्यं॥ तत्रकलशद्वयंनिधाय ॐद्वारश्रियै
नमः ऊर्ध्वदेहल्यैनमः अधःद्वारशाखयोः ॐमहाकालायनमः ॐभृंगिणेनमः कलशद्वये वाण्यै
नमः ॐवेण्यैनमः इति द्वारपूजा अथतोरणपूजाः तत्रपूर्वस्यांमंडपाद्बहिः सुहढकं नामतोरणं सुदृढमनन्तकंवा
तन्तुवटनिर्मितं आश्वत्थं ॐअग्निमीले इतिमंत्रेण तं तत्रनिधायपूजयेत् हस्ते अक्षतान्गृहीत्वा॥

वाशिष्ठलांकितं वैष्णवं चेतदा शंखांकितं

महावीर्यंमहाकायं।सिंदूरसदृशप्रभं तत्रद्वारे।।स्थितः शैलोमहेंद्रोनाम पर्वतः एह्येहि त्वंकृतयुग द्वारेम
हातितोरण अस्यांदिशिचरक्षेमौयज्ञेविघ्नांनिवारय सर्वसिद्धिंप्रयच्छामियजमानमहर्न्निशं गृहाणवि
ध्वयासास इंद्रस्याज्ञा।मिहावह इंद्रस्त्वामग्नेदे १ यः इंद्रः इंद्रियंमधुः २ त्रातारमिंद्रसाम ३ रुद्रजला
षभेषजमथर्वणे ॐ इंद्र आत्मापयस्वाहा ॐ पूर्वद्वारेस्थिताय अश्वत्थतोरणायदीर्घचतुरस्रायऊ
र्ध्वफलकसहिताय त्रिशूलयुक्ताय ऋग्वेदमूर्त्तये इंद्रदैवत्याय सुदृढनाम्नेसुशोभननाम्नेवा पूर्वतो
रणायनमः इतिगंधादिनांपूजयित्वा चंदनमालावस्त्रादिशोभितंकुर्यात् तत्रतोरणशाखयोः राहुबृ
हस्पतीन्यसेत् संपूजयेच्च ॐराहवेनमः ॐबृहस्पतयेनमः अत्रविशेषोग्रंथांतरात् तोरणेतोरणे
सुशोभननाम्नेपूज्या आदित्यावसवस्तथा पूज्यंतेविघ्ननाशार्थंमखोकाश्वस्यपल्लवैरिति ।। अथ
तोरणस्तंभानि ।। देवास्तोरणरूपेणसंस्थितायज्ञमंडपे विघ्नविध्वंसनार्थायरक्षार्थंत्वध्वरस्यच २४
इतिसंप्रार्थना अथतोरणदक्षिणोत्तरशाखयोर्मध्ये महीद्यौरित्यादिकलशस्थापनमंत्रैः क

लशं संस्थाप्य॥ तत्र ध्रुवासि ध्रुवोयमिति मंत्रेण ध्रुवमावाह्य पूजयेत् अ० तिथौ पूर्वतोरणपूजनं प
रिपूर्णमस्तु॥ ततो दक्षिणे गंतव्यं॥ तत्र औदुंबरं स्तंभद्वयं वा सुभद्रनामानं विकटनामानं वा त्रिशूलांकितं
वै स्तंभं चेन्न दाचकांकितं॥ इषे त्वोर्जे त्वा इति मंत्रेण तत्र निधाय॥ अक्षतान् गृहीत्वा॥ ॐ महावी
र्यं महाकायं भिन्नांजनसमप्रभुं तत्र द्वारे स्थितं कृष्णो विंध्यनामा च पर्वतः एहि त्रेतायुगं त्वं च द्वारे
महति तोरणे दक्षिणा दिशि रक्षेमं यत्नो विघ्नान्निवारय आगच्छ तोरणं प्रेष्य यमस्याज्ञामिहावह
ॐ यम आज्ञापय स्वाहा यस्मिन्वृक्षे ऋग्वेदे १ यमाय त्वा यजुः २ नौधसं सामवेदे ३ यमस्तु कासम
थर्वणे ४ ॐ भगवते औदुंबरनिर्मिताय ऊर्ध्वफलकाय त्रिशूलयुक्ताय यमदिशि स्थिताय यजुर्वेदमूर्त
ये यमदैवत्याय सुभद्रनाम्ने विकटनाम्ने दक्षिणतोरणाय नमः इति गंधादिना पूजयेत् वस्त्रालंकारादिभिः
शोभितं कुर्यात् तोरणशाखयोः सूर्यमंगारकैर्न्यसेत् पूजयेच्च ॐ सूर्याय नमः ॐ अंगारकाय नमः पूर्वव
त् कलशस्थापनमंत्रैः कलशं संस्थाप्य तत्र स्योना पृथिवीति मंत्रेण धरामावाह्य पूजयेत्॥ स्तुतिः देवा

स्तोरणरूपेण संस्थिताय यज्ञमंडपे । विघ्नविध्वंसनार्थाय परस्मात्वध्वरस्य चेति ॐ अद्यपू० तियो भगवतः वि
कटनाम्नः सुभद्रनाम्नो वा दक्षिणतोरणस्य पूजनं परिपूर्णमस्तु ॥ इति दक्षिणतोरणपूजनं ॥ अथ पश्चिमे ॥
तत्र प्लाक्षमौदुंबरं सुभीमं सुकर्मनामानं वा ॥ त्रिशूलांकं वै [illegible] वं चैव तदा गदांकितं अग्न आयाहीति मंत्रे
ण निधाय ॥ अक्षतान् गृहीत्वा ॐ महावीर्यं महाकायं सुवर्णसदृशप्रभं तत्र द्वारे स्थितः पीतो हेमकूटस्तु
पर्वतः एह्येहि द्वापरयुगद्वारे महति तोरणे अस्यां दिशि वरसे मां यज्ञे विघ्नान्निवारय आगच्छ तोरणाश्रय
वरुणत्वामिहावह ॐ वरुण आज्ञापय स्वाहा इमं मे ऋग्वेदे ॥१॥ तत्वायामि यजुः २ वरुणसाम सामवेदे ३
वरुणसूक्तमथर्वणे ॥४॥ ॐ भगवते प्लाक्षनिर्मिताय ऊर्ध्वफलकादिस्थिताय त्रिशूलयुक्ताय सामवेदमूर्त
ये वैरुणदैवत्याय सुभीमनाम्ने पश्चिमतोरणाय नमः इति गंधादिना पूजयेत् वस्त्रालंकारादिभिः शोभितं
कुर्यात् तत्र तोरणशाखयोः शुक्रबुधौ न्यसेत् पूजयेच्च ॐ शुक्राय नमः ॐ बुधाय नमः पूर्ववत्कलशं
स्थाप्य तत्र वाक्पतिमावाह्य बृहस्पते अति यदर्यो इति मंत्रेण पूजयेत् स्तुतिः ॥ देवास्तोरणरूपेण संस्थि २५

तायज्ञमंडपे विघ्नविध्वंसनार्थाय रक्षार्थं त्वत्स्वरस्येति अथ पू० तिथौ सुभीमनाम्नः सुकर्मनाम्नो वा
पश्चिमतोरणपूजनं पूरितपूर्णमस्तु । इति पश्चिमतोरणपूजा ॥ अथोत्तरे तत्रैव गोधमाश्वस्य वा पाला
शं वा सुहोत्रनाम्नां सुभवा त्रिशूलांकितं ॥ वैश्रवणे चेत्तरापश्चोकितं एतादृशं तोरणं शक्नोदेवीति मंत्रे
ण तत्र निधाय हस्ते अक्षतान्गृहीत्वा ॥ महावीर्यं महाकायं शुद्धस्फटिकसन्निभं तत्र द्वारे स्थितः सुभद्रेहि
सवाच्चामपर्वतः एह्येहि त्वं कलियुगद्वारे महति तोरणे अस्यां दिशि चरक्षेमां यज्ञे विघ्नान्निवारय
आगच्छ तोरणश्रेष्ठ सोमस्याज्ञामिहावह ॐ सोम आज्ञापय स्वाहा चंद्रमा अश्मु ऋग्वेदे १ इमं देवा यजु
र्वेदे २ शुक्रं चंद्रं साम ३ सोमस्त्वमथर्वणे ४ सुप्रभनामानं उत्तरतोरणं आवाहयामि इत्यावाह्य ॥ ॐ
भगवते वटनिर्मिताय ऊर्ध्वफलकादि स्थिताय त्रिशूलांकिताय सोमदैवत्याय ब्रह्मलवेरमूर्तये सुप्रभना
म्ने उत्तरतोरणाय नमः इति गंधादिना पूजयित्वा वस्त्रालंकारादिभिः शोभितं कुर्यात् तत्र तोरणशा
खयोर्मध्ये सोमकेतु शालीन्यसेत्पूजयेच्च ॥ ॐ सोमाय नमः ॐ केतवे नमः ॐ शानैश्वराय नमः ॥ पू

१ति उत्तरतोरणपूजनं । अथ पूर्वादिक्रमेण ध्वजपताकानां स्थापनं तत्र प्रथमं इंद्रवेद्यारे ३

26 र्ववत्कलशं संस्थाप्य॥ तत्र गणानां त्वेति मंत्रेण विघ्नेशं आवाह्य पूजयेत्॥ अथ स्तुतिः॥ देवास्तोरणरूपेण
संस्थिता यज्ञमंडपे विघ्नविध्वंसनार्थाय रक्षार्थमध्वरस्य चेति अद्य पू० तिथौ सुभद्रनाम्नः उत्तरतोरण
स्य पूजनं परिपूर्णमस्तु॥ पूर्ववद्धृत कलशद्वयं कलशस्थापनमंत्रैः स्थापयेत् ॐ तत्र कलशद्वये ऐरावतं
दिग्गजं च आवाह्य पूजयेत्॥ ॐ ऐरावताय नमः इति संपूज्य॥ ततस्तत्र सहस्राक्षमैरावतस्थमिंद्रं ध्यात्वा॥
ॐ एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश संवीज्यमानोप्सरसां गणेन रक्षाध्वरं नो भगव
न्नमस्ते भो इंद्र इहागच्छेह तिष्ठ इति कलशयोरिंद्रमावाह्य॥ ॐ आशुः शिशानो वृषभो न० इति पीतां पता
कां स्थापयेत् समुच्छ्रयेच्च ॐ संक्रंदनेनानिमिषेण० इति मंत्रेण पीतं ध्वजं च तत्र समुच्छ्रयेत् इंद्रं वो विश्व
त इति ऋग्वेदे १ त्रातारमिंद्रं यजुर्वेदे २ त्वामिद्धि सामनि ३ इंद्रमिद्धविस्त्वथर्वणे ॥४॥ एभिर्मंत्रैः इंद्रं गंधादिना २६
पूजयित्वा प्रार्थयेत् इंद्रः सुरपतिर्देवो वज्रहस्तो महाबलः शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः इतीं
द्रं नत्वा बलिर्देयः इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकायैतं माषभक्तबलिं समर्पयामि इति बलिं॥

कलशयोरग्रेसमर्प्ययेत् ततआचम्य आग्नेयांगत्वा तत्रकलशस्थापनंमंत्रैः कलशोर्द्धपकोणेसंस्था
प्य तत्रपुंडरीकं अनंतंचसंपूज्य ॐपुंडरीकायनमः पुंडरीकई०ॐ (ॐ अनंतायनमः अनंत ई० ॐ)।
कलशेपुंडरीकायनमः इतिसंपूज्य॥ तत्रछागस्थंरक्तंदक्षिणवामकरद्वयधृतशक्तिकमंडलुं अग्निंध्या
त्वा ॐ एह्येहिसर्वामरहव्यवाहमुनिप्रवीरैरभितोभिजुष्ट तेजोवतालोकगणेनसार्द्धंममाध्वरंपाहिस
दानमस्ते भोअग्नेइहागच्छेहतिष्ठेतिसांगंसपरिवारंसशक्तिकं अग्निं कलशेआवाह्य तत्रअग्निर्दूतंपु
रोदधे० इतिमंत्रेण रक्तवस्त्रजांपताकांसमुच्छ्रयेत्॥ तथाअग्निर्ध्वं हृदयेनाशानि ध्वं इतिमंत्रेणरक्तंध्वजं
चसमुच्छ्रयेत् पूजयेच्च ॐ अग्निंदूतंइतिऋग्वेदे १ त्वन्नोअग्नेवरुणस्येतियजुर्वेदे २ अग्निर्वृत्राणिसामवे
दे ३ अग्नमन्वेतमथर्ववेदे ४ एभिर्मंत्रैः कलशेअग्निंगंधादिनापूजयित्वा प्रार्थयेत्॥ आग्नेयःपुरुषोरक्तः
सर्वदेवमयोऽव्ययः धूमकेतुरजोध्यक्षस्तस्मैनित्यंनमोनमः ॥इतिनत्वाबलिंदद्यात्॥ ॐ सांगायसपरिवा
वारायसायुधायसशक्तिकायाग्नयेएतंमाषभक्तबलिंसमर्प्पयामि इतिकलशाग्रेबलिंसमर्पयेत्॥

27 तत आचम्य दक्षिणे गत्वा तत्र प्रतिद्वारशाखं कलशद्वयं कलशस्थापनमंत्रैः संस्थाप्य कलशयोरुपरि वामना
ख्यं दिग्गजं पूजयेत् ॐ वामनाख्य दिग्गज इहागच्छ इह तिष्ठ इत्यावाह्य गंधादिना पूजयेत् ततो महिषारूढ
धृतदंडपाशं दक्षिणवामकरद्वयं कृष्णाजिनचयोपमम् अग्निसमलोचनं यमं शीर्ध्यात्वा ॐ मेह्येहि वैवस्वत
धर्मराज सर्वामरैरर्चित धर्ममूर्ते शुभाशुभानंद शुचामधीश शिवाय नः पाहि मखं नमस्ते नोयमेहागच्छ
इह तिष्ठ इति श्रृंगादिविशिष्टं यमं कलशयोरावाह्य ॥ ॐ आयं गौः पृश्निरक्रमी इति मंत्रेण धूम्रवर्णां पताकां
च तत्र समुच्छ्रयेत् कृष्णवर्णां वा ॥ तथा ॐ अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणमिति मंत्रेण रु
वर्णध्वजं च तत्र समुच्छ्रयेत् पूजयेच्च ॥ यमाय सोमं ऋग्वेदे १ सुगं नु पंथां प्रदिशन्निति यजुः २ नाके सुप
र्णसाम ३ यमो नस्तु रथर्ववेदे ४ इति मंत्रैर्गंधादिना पूजयित्वा प्रार्थयेत् महामहिषमारूढ दंडहस्त
महाबल त्वां नमामि च यज्ञेऽस्मिन् पूजे यम प्रतिगृह्यतामिति यमं नत्वा बलिर्देयः ॐ सांगाय सपरिवारा २७
य सायुधाय सवाहनाय सशक्तिकाय यमाय एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् तत आचम्य ।

नैर्ऋत्यां गत्वा मंडपकोणे पूर्ववत्कलशस्थापनमंत्रैः कलशं स्थापयित्वा तत्रकुमुदाख्यं दिग्गजं
आवाह्य दुर्ज्जयं दिग्गजं चावाह्य गंधादिना चतुर्थ्यंतेन पूजयित्वा तत्र कलशद्वये नराख्ढं खड्ग
हस्तं महाकायं महाबलं बहुशस्त्रसंयुतं पीताभरणभूषितं निर्ऋतिं ध्यात्वा॥ एह्येहि रक्षोगणनाय
क त्वं विशालवेतालपिशाचसंघैः ममाध्वरं पाहि शुभाधिनाथ लोकेश्वर त्वं भगवन्नमस्ते १ ॐ निर्ऋत
इहागच्छेह तिष्ठ॥ इति कलशे सांगं निर्ऋतिमावाह्य॥ ॐ असुन्वंतमयजमान इति मंत्रेण॥ नीलवर्णप
ताकामनेनैव मंत्रेण नीलं ध्वजं च समुच्छ्रयेत् पूजयेच्च ततो मोषूण इति ऋग्वेदे १ असुन्वंतमयजुर्वेदे २
वेच्छाहि साम ३ अभित्वांत निर्ऋतिरथर्ववेदे ४ इति मंत्रैर्निर्ऋतिं गंधादिना पूजयित्वा॥ प्रार्थयेत्॥ नै
र्ऋतं खड्गहस्तं च सर्वलोकैकपावनं त्वां नमामि च यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यतामिति नत्वा बलिर्देयः
ॐ सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय निर्ऋतये एतं माषभक्तबलिं समर्पयामि
इति बलिं दत्वा तत आचम्य पश्चिमे गंतव्यं तत्र पश्चिमद्वारे कलशस्थापनमंत्रैः कलशद्वयं संस्था

२४ प्य॥ तत्रकलशद्वये अंजनाख्यं दिग्गजमावाह्य पूजयेत् ॐ अंजनाख्य दिग्गज इहा॰ष्ठ॰ अंजनाख्य दि
ग्गजायनमः इतिगंधादिनाभ्यर्च्य॥ ततोकलशद्वये करस्थंपाशहस्तंशुक्लवर्णं किरीटधारिणं वरुणं
ध्यात्वा॥ ॐ मेह्येहियादोगणवारिधीनांगणेनपर्जन्यसहाप्सरोभिः विद्याधरेंद्रामरगीयमानपाहित्वन
स्मान्भगवन्नमस्ते इमंमेवरुणेतिमंत्रेण ॐ वरुण इहागच्छेह तिष्ठ॥ इतिकलशेप्योरंगादिविशिष्टं व
रुणमावाह्य॥ इमंमे वरुणेतिमंत्रेण श्वेतांपताकांसमर्पयेत् ॐ अग्न आयाहि वीतये गृणानो हव्यदातये नि होता सत्सि बर्हिषि
ॐ तत्वायामीति ऋग्यजुषि २ इमंमे वरुण सामवेदे ३ येयस्त्रा न्नुहूत्यथर्ववेदे ४ इतिमंत्रैः पूर्ववत् वरुणं
गंधादिनापूजयित्वा प्रार्थयेत् पाशहस्तंचवरुणं यादसांपतिमीश्वरं त्वांनमामि चयज्ञेस्मिन् वरुण
यत्नमोनमः इतिनत्वा॥ वलिर्देयः ॐ सांगायसपरिवारायसायुधायसवाहनायसशक्तिकाय वरुणाय एतं
माषभक्तवलिंसमर्पयामि इतिवलिंदत्वा आचम्य वायव्यांगंतव्यं तत्रमंडपवायुकोणेस्तंभाग्रेपूर्व २८
वत् कलशंसंस्थाप्य॥ तत्रपुष्पदंतं दिग्गजंसंपूज्य॥ सद्धोर्थचो॥ ॐ पुष्पदंत इहा॰ ष्ठेतिकलशेआवाह्य॥

पुष्पदंतदिग्गजायनमः इतिगंधादिभिःपूजांकुर्यात् तत्रकलशे मृगाधिरूढंधूम्रवर्णंचित्रांबरधरं
युवानंवरध्वजंदक्षिणवामहस्तद्वयंवायुंध्यात्वा ॐ मेह्येहियज्ञेममरक्षणायमृगादिरूढः सहसिद्धसंघैः
प्राणाधिपःकालपतेःसहायगृहाणपूजांभगवन्नमस्ते भोवायोइहागच्छ इतिअंगादिविशिष्टंकल
शेवायुमावाह्य॥ ॐ प्राणदाऽर्पनदाइतिमंत्रेणश्वेपीतांधूम्रांवापताकांसमुच्छ्रयेत् ॐ वायोयेतेसह
स्त्रिणःइतिमंत्रेणधूम्रध्वजंसमुच्छ्रयेत् पूजयेच्च॥ ॐ तववायवृतस्पतइतिऋग्वेदे १ आनोनियुद्भिःय
जुर्वेदे २ वातआवातसामवेदे ३ वायोःसवितुरित्यथर्ववेदे ४ इतिमंत्रैर्वायुंगंधादिनापूजयेत् प्रार्थयेत्
वायुमाकाशगंचैवपवनंवेगवद्गतिं त्वांनानामिचयज्ञेस्मिन्पूजेयंप्रतिगृह्यतां ॥१॥ अर्नीकारोमहोजा
श्वयम्बाहक्षिगतिर्हिवि तस्मैपूज्यायजगतोवायवेहंनमामिचेतिनत्वा॥ वलिर्देयः॥ ॐ सांगायसपरिवा
रायसायुधायसवाहनायसशक्तिकायवायवेएतंमाषभक्तबलिंसमर्पयामि इतिकलशाग्रेबलिंनि
वेद्य॥ ॥ततआचम्य॥ उत्तरद्वारेगच्छेत्तत्रोत्तरद्वारेकलशस्थापनंमंत्रैः॥ दध्यक्षतादियुक्तंकलश

द्वयं संस्थाप्य तत्र सार्वभौमं दिग्गजं कलशयोर्न्यस्य ॐ सार्वभौम दिग्गज इहा० इत्यावाह्य ॐ सार्वभौ
29 म दिग्गजाय नम इति गंधादिना पूजयेत् ततो मरयुतपुष्पक । विमानस्थं कुंडलहारकेयूररुचिरांवर गदा
२ धरं दक्षिणवाम भुज द्वयं महोदरं महाकायं हरितवर्णं कुवेरं ध्यात्वा ॥ ॐ मेह्येहि यक्षेश्वर यक्षरक्षो विधत्स्व
नक्षत्रगणेन सार्द्धं सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते भो सोम इहागच्छेह तिष्ठेति
कलशयोरावाह्य ॐ आप्यायस्व समेतु ते इति मंत्रेण हरितांपताकां श्वेतां वा समुच्छ्रयेत् ॥ तथा ॐ
सोमं राजानमवसे ग्निमिति हरितं ध्वजं पद्मवर्णं वा समुच्छ्रयेत् ॥ पूजयेच्च ॥ ॐ सोमो धेनुं० ऋग्वेदे १
वयं सोम व्रते इति यजुषि २ स्वादिष्ठया साम ३ यदुन्नर इत्यथर्ववेदे ४ एभिर्मंत्रैः कलशयोः सोमं पूज
यित्वा ॥ प्रार्थयेत् सर्वनक्षत्रमध्येतु सोमो राजाव्यवस्थितः तस्मै सोमाय देवाय नक्षत्रपतये नमः ॥ इति
नत्वा वलिं दद्यात् ॐ सोमाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय सोमायेतं यमाषभक्तवलिं २९
समर्पयामीति वलिं दत्वा आचम्य ॥ ईशाने गत्वा ॥ तत्र मंडपैशानकोणे पूर्ववत् कलशस्थापनमंत्रैः

कलशं स्थापयित्वा ॥ तत्र सुप्रतीकनामानं दिग्गजं मंगलं चावाह्य पूजयेत् ॐ सुप्रतीकदिग्गज इहा० इत्यावा
ह्य ॐ सुप्रतीकदिग्गजाय नमः इति गंधादिना पूजयित्वा ॥ तत्रैव कलशे वृषारूढं दक्षिणवामहस्ते कर्पर
त्रिशूलधरं त्रिनेत्रं शुक्लवर्णमीशानं ध्यात्वा ॥ ॐ एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वांगधरेण सार्द्धं
लोकेश यज्ञेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते भो ईशानेहागच्छेह तिष्ठेति सांगं आवाह्य ॐ तमी
शानं जगतः० इति मंत्रेण श्वेतवर्णां पताकामनेनैव मंत्रेण श्वेतं ध्वजं च तत्र समुच्छ्रयेत् पूजयेच्च ॥ ॐ
तमीशानं० इति ऋग्यजुषोः ॥२॥ तद्योगयसाम्नि ३ धातादद्दात्यथर्ववेदे ४ इति मंत्रैरीशानं गंधादिनाभ्यर्च्य
प्रार्थयेत् ॥ वृषस्कंधसमारूढ शूलहस्त त्रिलोचन त्वान्नमामि च यज्ञेस्मिन् पूजेयं प्रतिगृह्यतां ॥ सर्वाधि
पो महादेव ईशानः शुक्ल ईश्वरः शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नमः इति नत्वा बलिर्देयः ॐ सां
गाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय ईशानाय एतं माषभक्तबलिं समर्पयामीति बलिं दत्वा
आचम्य ईशानपूर्वयोर्मध्ये अधः उपविश्य कलशादिनैव अनंतं शयनासीनं फणासप्तकमंडितं ॥

30 पद्मशंखधरोर्ध्वाधोदक्षिणकरद्वयंचक्रगदाधरोर्ध्वाधौवामकरद्वयंनीलवर्णमनंतंध्यात्वा ॐ मे
ह्येहियातालेधरामरेंद्रनागांगनाकिन्नरगीयमानः यक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्वरमस्मदीयं
मोऽनंतेहागछेहतिष्ठ इतिसांगमनंतमावाह्य ॥ ॐ नमोस्तुसर्प्पमंत्रेण आयंगौरितिमंत्रेणवाश्वेत
वर्णयतांकोमेघवर्णवासमुच्छ्रयेत् ॐ याइषवोयातुधानाइतिमंत्रेण आयंगौरितिवा॥ चित्रवर्णं
ध्वजेश्वेतंवासमुच्छ्रयेत् पूजयेच्च ॐ सहस्रशीर्षाऋग्वेदे १ अस्मेरुद्रामेहनायजुर्वेदे ॥२॥ समानोत्म
ध्वासाम ३ अनंतेवितथं अथर्ववेदे ४ इतिमंत्रैरनंतं गंधादिभिरभ्यर्च्य॥ प्रार्थयेत्॥ योसावनंतरूपे
ण ब्रह्मांडं सचराचरं पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यंनमोनमः इतिनत्वा बलिंदद्यः सांगायसपरि
वारायसायुधायसवाहनायसशक्तिकायाँअनंतपूजाउक्ता ॥ ततआचम्य पश्चिमेगतव्यं तत्रपश्चि
मेनैऋत्यमध्येकलशं।विनैवऊर्ध्वमुद्दिश्य कुशमुष्टिधरोर्ध्वाधोदक्षिणकरद्वयंस्रुक्सिकमंडलुधरोर्ध्वा 30
धोवामकरद्वयंचतुर्मुखंश्मश्रुलंजटिलंलंबोदरंरक्तवर्णंब्रह्माणंध्यात्वा ॐ मेह्येहिसर्वाधिपते
नेतायैतंमा... बलिं समर्पयामीति बलिंदद्यः रूपनारायणमते नैऋत्यपश्चिममध्ये ३

सुरेंद्रलोकेन सार्द्धं पितृदेवताभिः सर्वस्य धाता ह्यमितप्रभावो विश्वाध्वरं नः सततं शिवाय ॥ ओं ब्रह्मन्
इहागच्छेह तिष्ठ ॥ इत्यावाह्य ॥ ॐ ब्रह्मयज्ञानं प्रथमं इति मंत्रेण रक्तवर्णां पताकां रक्तगौरां वा समुच्छ्रयेत्
ॐ ब्रह्मयज्ञानमित्यनेनैव मंत्रेण रक्तवर्णां ध्वजं पंचवर्णां वा समुच्छ्रयेत् पूजयेच्च ॐ ब्रह्मयज्ञानं ऋग्यजुः
सामवेदेषु ॥३॥ ब्रह्मपरमुज्यताम थर्ववेदे ॥४॥ इति मंत्रैर्ब्रह्माणं गंधादिनाभ्यर्च्य ॥ प्रार्थयेत् ॥ पद्मयोनि
श्चतुर्मूर्तिर्वेदावासः पितामहः यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमोनमः इति नत्वा बलिं दद्यात् ॐ सां
गाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय ब्रह्मणे एतं माषभक्तबलिं समर्पयामि ॥ इति बलिं द
त्वा ॥ आचम्य ॥ अन्ये तु स्योना पृथिवीति मंत्रेण पृथिवीं पूजयंति तेनैव ध्वजं पताकां च पूजयंति रूपनारा
यणमते ईशानपूर्वयोर्मध्ये ब्रह्मपूजनमुक्तं ~~ततो मंडपं पुष्पमालाचामरदर्पणादिभिर्भूषितं कुर्यात्~~ ॥ अ
थ मंडपे यद्भूमिमध्ये अस्तु च दंडे दशहस्तदीर्घ त्रिहस्तविस्तरः पंचहस्तदीर्घो हस्तमात्रविस्तारो वा ॥
महाध्वजः किंकिण्यादियुक्तः इंद्रस्य वृष्ण इति मंत्रेण स्थाप्य ॥ ॐ इंद्रस्य वृष्णो वरुणस्य राज्ञ० इति मंत्रेण

ततो मंडपं पुष्पमालाचामरदर्पणादिभिर्भूषितं कुर्यात् । इति मंडपभूषणविधिः ॥ ने ३

३। समुच्छ्रयेत् पूजयेच्च ॐ मध्यस्थितायै महाध्वजायै सर्ववर्णायै किन्नरदंडस्थितायै सर्वध्वजनायकाधिष्ठि
तायै किंकिणिकाशब्दितायै ऊर्ध्वध्वजायै नमः इति पूजयेत् अथवा यस्य देवस्य यज्ञस्तन्मंत्रेणारोपणीयः
अपूपैर्बलिर्देयः ॥ अथ पू० तिथौ मंडपदेवतानां पूजनं नयरिपूर्णोक्त ॥ लोके यानि भूतानि स्थावराणि चराणि
च ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु मुदाहृताः तानि मे ॥ ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह रक्षंतु मंड
पं सर्वे घ्नंतु रक्षांसि सर्वतः इति पठित्वा ॥ ततो यजमानः मंडपाद्बहिः चतुर्दिक्षु पायसादि बलिं दद्यात् पूर्वे
उपलिप्तभूमौ बलिपात्रं निधाय हस्ते जलं गृहीत्वा ॥ ॐ नमः पूर्वदिग्वासिभ्यो दिक्पतिदिक्भूतादिगण
पतिदिक्पालदिक्क्षेत्रपतिभ्य एष पायसबलिर्नमः स्वाहाः एवं दक्षिणे ॥ ॐ नमो दक्षिणदिग्वासिभ्यो० ॥
एवं पश्चिमे ॐ नमः पश्चिमदिग्वासिभ्यो० एवमुत्तरे ॥ ॐ नमो उत्तरदिग्वासिभ्यो० इति बलिं दद्यात् ह
स्तपादप्रक्षालनमाचमनं कुर्यात् चेत् आयात् ॥ इति बलिदानं ॥ ततो यजमानः सर्वैः ऋत्विग्भिः सह प्राग्द्वा
रेण मंडपे प्रविश्य मंडपाद्ः पश्चिमदेशे पूर्वाभिमुखश्च उपविश्य । आचम्य यथाविहितं कर्म कुरुतेति आचा ३१

र्यादीन्प्रेषयेत् गुर्वादयोयथाविहितकर्मकुरुध्वं इतिवीवदेत् ततोग्निस्थापनं यजमानः आचम्य प्रा
णायामः देशकालसंकीर्त्तनांते गोत्रोकशर्माहं मम अमुककामनया ब्राह्मण द्वारा कृतस्य श्रीमहारुद्रजपस्य प
रिपूर्णतासिद्ध्यर्थं जपदशांससंख्यायाहवनकर्मप्रारंभनिमित्तं महारुद्रयज्ञसिद्ध्यर्थं पंचभूसंस्कारपूर्वकम
ग्निस्थापनमहं करिष्ये कुंडस्येत्तदा कुंडमेखलापूजनयोनिपूजन कुंडपूजनाद्यग्निसंस्कारपूर्वकमग्नि
स्थापनमहं करिष्येतिसंकल्प्य ।। तत्र प्रथमं कुंडं गायत्र्या पंचगवेन च प्रोक्ष्येहेमारत्नगर्भैश्च गर्भितं कृत्वा
(तत आचार्यः पूर्ववत्सामान्यार्घ्यं परिकल्प्य मेखलापूजनं कुर्यात्) ऊर्ध्वमेखलायां श्वेतवर्णसंस्कृतायां विष्णु
मावाह्य पूजयेत् ।। अक्षतान् गृहीत्वा ।। ॐ इदं विष्णुर्विचक्रमे० ऊर्ध्वमेखलायां विष्णो इहागच्छेह तिष्ठ वि
ष्णवे नमः विष्णुमावाहयामि स्थापयामि ततो मध्यमेखलायां र[क्त]वर्णकृष्णवर्णसंस्कृतायां ॐ इमारुद्राय
तवसे कपर्दिने० रुद्र इहा० रुद्राय० रुद्रमावा० मि ततो योन्यां उमा गौरीति गौरीं स्थापयामि गं घादिना श्रीअत्रे
पूजयेत् अथ पंचभूसंस्काराः परिसमुह्य त्रिभिर्दर्भैः पांसूनपसार्य कुंडमध्ये गोकर्णमात्रं वा द्वयंर
संस्कृतायां ॐ ब्रह्मयज्ञानं प्रथमं ब्रह्मणे नमः ब्रह्माणमावा
हयामि स्थापयामि ततः अधोमेखलायां र

ततः आचार्यः स्वर्वे वत्सान्नार्घं परिकल्प्य । मेखलाहनं कुर्यात् २

मंत्रगेणत्रिः परिमार्णा प्रदक्षिणं त्रिःपरिसमूहेत् ॐ गोमयोदकाभ्यामुपलिप्य कुंडे सद्गोमयार्द्रमानस्तो
३४ केत्यनुलिंपेत् स्रुवेणोल्लिखेत् प्रागग्राउदक संस्थाः स्थंडिल परिमाणास्तिरेखाः कृत्वा कुंडेयज्ञियकाष्ठा
ग्रेण आवत्रे ष्विंड्सत्यनिं नरस्त्वा काष्ठास्ववर्तः इतिमंत्रेण विस्तोररराटमिति त्रिरुल्लिखेत् ततो गुष्ठा
ख नामिकाभ्यां यथोल्लिखिताभ्यो लेभ्यः पांसूनुद्धरेत् मंचमुद्धरेत् कुंडे सदसस्पतिरिति पांसूनुध्धृत्य प्राच
मुद्धरेत् एवमपररेखयोः तं देशं कुशोदकेनाभ्युक्ष्य कुंडे तदग्रनुज्ञमुष्टिना ड्रिदं वस्यूत्वेति प्रतिरेखाम
भ्युक्षयेत् इतिपंचभूसंस्कारः ॥ कुंडमध्ये अष्टास्त्रयंत्रं परि लिख्य यंत्रं तु मत्स्य द्वैव्या । त्रिकोणं षट्कोणं हृत्ताष्टदल
चतुरस्त्राणि कृत्वा कुंडे ॐ योगपीठायनमः । ॐ वागीश्वर्यै नमः इति संपूज्य । मूलेन कुंडं वीक्ष्य अस्त्रेण प्रोक्ष्य तेनैव दर्भैः संताड्य कवचेनाभ्युक्ष्य ।
दशार्णेनाभिमंत्र्य ॥ धेनुमुद्रयामृतीकृत्य अवगुंठमुद्रयाऽवगुंठ्य ॥ चक्रमुद्रया
कुंडं गंधादिनाभ्यर्च्य ॐ वीजं स्वाहा शक्तिः अ
संरक्ष्य ॐ भूर्भुवः स्वः स्वाहेत्यस्याग्निमंत्रोर्ब्रह्म ऋषिर्गायत्री छंदः अग्निर्देवता ॐ वीजं स्वाहा शक्तिः अ
ग्निस्थापने विनियोगः व्याहृत्या षडंगं कुर्यात् ॐ भूः १ भुवः २ स्वः ३ भूः ४ भुवः ५ स्वः ६ स्वांगदेशे षडंगंवि २२

न्यस्य संस्कृते कुंडे इष्टदलेषु पीठशक्तीः पूजयेत् ॐ पीतायै नमः १ ॐ श्वेतायै नमः २ ॐ अरुणायै नमः ३
ॐ धूम्रायै नमः ४ ॐ तीव्रायै नमः ५ ॐ स्फुलिंगायै नमः ६ ॐ रुचिरायै नमः ७ सद्योज्वालिन्यै नमः ८ इति पी
ठशक्तिं संपूज्य तत्र आरणिकं सूर्यमणिसंभवं लौकिकं वाऽन्यमग्निमाय साश्म गोमयमृण्मयनिर्मित
पात्रव्यतिरिक्तताम्रादिसंपुटेन हस्तघटितवर्द्धनीसंपुटेन वा प्रांतिपठनुपकुंडं समानीय वह्निदिग्भागे
निधाय तदनु मंचकासनोपरि सकलजगन्मयीं वागीशमतीद्वियाख्यां शक्तिं नीलाब्जवर्णमदतस्ना
तां परमाशिवां ध्यात्वा नाभ्यामुत्पन्नमिति संभाव्य संपुटमुद्घाट्य ॐ नग्ने त्वं शिववीजेन महामाया
गर्भसंभूतोसि इति प्रार्थयित्वा ॐ फिट्टिति मंत्रेण क्रव्यादांशं नैरृत्यां परित्यज्य शुद्धं देवांशं अग्निमूर्द्धे
तिमंत्रेण स्वपुरत आनीय पुष्पाक्षतान् गृहीत्वा उत्पत्तिमुद्रया देदीप्यमानं चिदग्निमाकृष्य नासाग्रश्वा
समार्गेण पुष्पाञ्जलावानीय ॐ ह्रीं वह्निचैतन्याय नमः इत्युक्त्वा पात्राग्नौ निवेश्य पुष्पादिकं सर्वं अ
ग्निपात्रे निधाय तत औदर्यसंधववाह्याग्नीनामेकं भावयेत् ततः शिवस्वरूपमग्निं प्रणवेनात्मनो

३३ ग्निमुखं शांडिल्यगोत्रं शांडिल्यासितदेवलेतित्रिः प्रवरं अरणिमातरं वरुणपितरं पश्चिमचरणं
वशिशिरस्कं यज्ञोपवीतगंधानतमंगलनामानं ॐ भूर्भुवः स्वरोम् इत्यग्निमुपसमाधाय भो अग्ने स्वागतो भवः १ सुप्रतिष्ठ
तो भव २ सुप्रसन्नो भव ३ वरदो भव ४ इति मुद्राचतुष्टयं दर्शयित्वा प्रणमेत् इत्यग्निस्थापनं हस्ते जलं गृहीत्वा
॥ अद्य० तिथौ० शतमंगलनाम्नएतस्याग्नेः पवित्रीकरणार्थं चतुष्पथसंस्कारैः संस्करिष्ये ॥ तत्र दर्शनेन
वीक्षणं अस्त्रेण प्रोक्षणं अस्त्रेणैव त्रिदर्भैस्ताडनं कवचेनाभ्युक्षणं ततो मूलेनाभिमंत्र्य ॥ धेनुमुद्रयामृ
तीकृत्य कवचेनावगुंठ्य अस्त्रेण संरक्ष्य हविषाभिधारितानि शुद्धानि दारूणि तत्र प्रक्षिप्य ॐ चित् पिंग
ल हन २ दह २ पच २ सर्वाज्ञांज्ञापय स्वाहा अनेन मंत्रेण प्रज्वालिन्या मुद्रया प्रज्वालयेत् तल्लक्षणं म
णिवंधौ समौ कृत्वा संप्रसार्यांगुलीर्दश निम्नेकरतले कृत्वा मुद्रा प्रज्वालिनी शुभा अथाग्न्युपस्थानं ॥
ॐ अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं हिरण्यवर्णमनलं समृद्धं विश्वतोमुखं इत्युपस्थायाग्निं ध्या ३३
येत् पुष्पाणि गृहीत्वा यठेत् ॥ रुद्रतेजसमुद्भूतं द्विमूर्द्धानं द्विनासिकं षण्णेत्रं च चतुःश्रोत्रं त्रिपादं स

प्रहस्तकं याम्यभागेचतुर्हस्तंसव्यभागेत्रिहस्तकं स्रुवंस्रुचंचशक्तिंच अक्षमालांचदक्षिणे तोमरंव्यज
नंचैवघृतपात्रंतुवामके विभ्रंतंसप्तभिर्हस्तैर्द्विमुखंसप्तजिह्वकं दक्षिणेचचतुर्जिह्वं त्रिजिह्वमुत्तरंमुखं
द्वादशांकोटिमूर्त्यारव्यं द्विपंचाशत्कलायुतं स्वाहास्वधावषट्कारै रंकितंमेषवाहनं रक्तमाल्यांवरंरक्तं
रक्तपद्मासनस्थितं रौद्रंत्वांशिवनामानंवह्निमावाहयाम्यहं त्वंमुखंसर्वदेवानांसप्तार्चिरमितद्युते आग
च्छभगवन्नग्नेयज्ञेस्मिन्संन्निधिंकुरु इतिपुष्पांजलिना आवाह्य ॐ आवाहितोभवः १ आवाहनेमुद्राल
क्षणं हस्ताभ्यामंजलिंकृत्वानामिकामूलपर्वणोः अंगुष्ठौनिक्षिपेन्मुद्रावाहनीसात्वधोमुखी १ संस्था
पितोभव॥ आवाहनमुद्रा अधोमुखीकृतासाएवंसंस्थापिनी ॐ सन्निधोभव आश्लिष्टमुष्टियुगला प्रोन्न
तांगुष्ठयुग्मिका सन्निधानेसमुद्दिष्टामुद्रेयंतत्ववेदिभिः २ ॐ सन्निरुद्धोभव॥ अंगुष्ठगर्भिणीसैवस
न्निरोधेसमीरिता ॥४॥ ततःसकलीकरणमुद्रयासम्मुखीकरणंकुर्यात् तत्प्रमाणं देवतांगेषडंगानां
न्यासः स्यात्सकलीकृतिः ॐ सकलीकृतोभव॥ यथादर्भांकुरेणाग्निंस्पृशन्षडंगानिन्यसेत्॥ तद्यथा॥

२२

35 ॐ सहस्रार्चिषे हृदयाय नमः १ स्वस्तिपूर्णाशिरसे स्वाहा ॐ उत्तिष्ठपुरुषाय शिखायै वषट् धूमव्यापिनेन
मः कवचाय हुं ॐ सप्तजिह्वायै नमः नेत्रत्रयाय वौषट् ॐ धनुर्द्धराय नमः अस्त्राय फट् इति सम्मुखीक
रणं ॐ अवगुंठितो भव सम्मुखीकृततर्ज्जन्यो बद्धमुष्टिहृद्यादुत्त ।। सव्यापसव्यभ्रमणान्मुद्रेयमवगुंठ
नी ॐ अमृतीकृतो भव इति आवाहनादि सप्तमुद्राः प्रदर्श्य ।। अथ स्वदेहे न्यासः ।। ॐ स्रूं पद्मरागा
यै नमः पादयोः ॐ स्रूं अग्निजिह्वायै नमः लिंगे ।। ॐ [illegible] सुवर्णायै अग्निजिह्वायै नमो हृदये ॐ ख्रूं भ
द्रलोहितायै अग्निजिह्वायै नमः शिरसि ॐ व्रूं लोहितायै अग्निजिह्वायै नमो मुखे ॐ ल्रूं श्वेतायै अ
ग्निजिह्वायै नमो घ्राणे ॐ भ्रूं धूमिन्यै अग्निजिह्वायै नमो नेत्रयोः ॐ क्रूं करात्यै अग्निजिह्वायै नमः स
र्वांगे ॐ सहस्रार्चिषे हृदयाय नमः ॐ स्वस्तिपूर्णाय शिरसे स्वाहा ॐ उत्तिष्ठपुरुषाय शिखायै वषट्
ॐ धूमव्यापिने कवचाय हुं ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् ॐ धनुर्द्धराय अस्त्राय फट् ॐ अग्नये 38
जातवेदसे नमो मूर्द्ध्नि ॐ अग्नये सप्तजिह्वाय नमो दक्षकरे ॐ अग्नये हव्यवाहनाय दक्षिणकांघ्यां ।।

२१

ॐ अग्नये अघोरायनमो लिंगे ॥ ॐ अग्नये वैश्वानरायनमो वामकक्षे ॐ अग्नये कौमारतेजसे नमो वाम
पार्श्वे ॐ अग्नये विश्वमुखाय नमो वामांसे ॐ अग्नये देवमुखाय नमः शिखायां ॥ इति स्वदेहे न्यासं कुर्यात् ॥
केचिद् त्रमेखलापूजनं कुर्वंति पूर्वोक्तमंत्रैः ब्रह्मविष्णुरुद्रान् मेखलासु योन्यां श्रीश्वनेतिमंत्रेण लक्ष्मीं संपू
ज्य वह्नौ यंत्रं विचिंत्य ॥ षट्दलेषु आग्नेयादिकोणेषु पुरतः पश्चान्मध्ये च ॥ पद्मरागायै नमः इत्यादि स
प्तजिह्वाः संपूजयेत् ॥ तद्यथा ॥ ॐ स्फूं पद्मरागायै अग्निजिह्वायै नमः पद्मरागांअग्निजिह्वां पूजयामि ॥
इत्याग्नेयां १ ॐ ष्फूं सुवर्णायै अग्निजिह्वायै नमः ॥ ॐ सुवर्णामग्निजिह्वां पू० इति नैरृत्यां २ ॐ श्फूं भद्र
लोहितायै अग्निजिह्वायै नमः भद्रलोहितामग्निजिह्वां पू० इति वायव्यां ३ ॐ क्रूं लोहितायै अग्निजि
ह्वायै नमः लोहितामग्निजिह्वां पू० इतीशान्यां ४ ॐ ल्फूं श्वेतायै अग्निजिह्वायै नमः श्वेतामग्निजिह्वां पू०
इति पूर्वे ५ ॐ श्रफूं धूम्रिन्यै अग्निजिह्वायै नमः धूम्रिनीमग्निजिह्वां पूजयामि इति पश्चिमे ६ ॐ ष्फूं
करालयै अग्निजिह्वायै नमः करालीमग्निजिह्वां पू० इति मध्ये ॥ ७ ॥ पुनराग्नेयादिकोणेषु पुरतः ॥

३५ पश्चाच्च सहस्रार्चिषेत्यादि षडंगानि पूजयेत् तद्यथा ॐ सहस्रार्चिषे हृदयाय नमः सहस्रार्चिषं पू० इत्या
ग्नेय्यां ॥१॥ ॐ स्वस्तिपूर्णाय शिरसे स्वाहा स्वस्तिपूर्णं पू० इति नैर्ऋत्यां ॥२॥ ॐ उत्तिष्ठपुरुषाय नमः। शिखायै वषट्
उत्तिष्ठपुरुषं पू० इति वायव्यां ॥३॥ ॐ धूमव्यापिने नमः कवचाय हुं धूमव्यापिनं पू० इतीशाने ॥४॥ ॐ
सप्तजिह्वाय नमः नेत्रत्रयाय वौषट् सप्तजिह्वकं पू० इति पूर्वे ५ ॐ धनुर्धराय अस्त्राय फट् धनुर्धरं पू०
इति पश्चिमे ७ अतः ततः अष्टदलेषु पूर्वादि अग्नये जातवेदसे इत्यष्टौ मूर्त्तीः पूजयेत् तद्यथा ॥ ॐ
अग्नये जातवेदसे नमः जातवेदसं पू० पूर्वे १ ॐ अग्नये सप्तजिह्वाय नमः सप्तजिह्वं पू० इत्यग्निकोणे २
ॐ अग्नये हव्यवाहनाय नमः हव्यवाहनं पू० इति दक्षिणे ३ ॐ अग्नये ऽश्वोदराय नमः अश्वोदरं पू० इ
ति नैर्ऋत्यां ॥४॥ ॐ अग्नये वैश्वानराय नमः वैश्वानरं पू० इति पश्चिमे ॥ ५॥ ॐ अग्नये कौमारतेजसे
नमः कौमारतेजसं पू० इति वायव्यां ॥ ६॥ ॐ अग्नये विश्वमुखाय नमः विश्वमुखं पूजयामि इति पश्चि
मे ७ ॐ अग्नये देवमुखाय नमः देवमुखं पू० इतीशान्यां ॥८॥ ततश्चतुरस्रे पूर्वादिदिक्षु इंद्राद्यष्टौ

लोकपालान् तदायुधानि च पूजयेत् तद्यथा ॐ पूर्वे इंद्रायनमः इंद्रं पू० १ ॐ आग्नेयां अग्नये० अग्नि
पू० २ ॐ दक्षिणे यमायनमः यमं पू० ३ नैर्ऋते ॐ नैर्ऋतयेनमः निर्ऋतिं पू० ४ पश्चिमे ॐ वरुणायनमः
वरुणं पू० ५ वायव्यां ॐ वायवेनमः वायुं पू० ६ उत्तरे ॐ कुवेरायनमः कुवेरं पू० ७ ईशाने ॐ मीशाना
यनमः ईशानं पू० पुनः पूर्वादि ॐ वज्रायनमः वज्रं पूजयामीति सर्वत्र ॥१॥ शक्तये २ दंडाय० ३ खड्गाय० ४
पाशाय० ५ ॐ अंकुशाय० ६ ॐ गदायै० ७ ॐ त्रिशूलाय० ८ इति संपूज्य ॥ ततः कुंडं नवसूत्र्या संवेष्ट्य ॥
ततोग्निं गंधाद्युपचारैरर्चयेत् तद्यथा ॐ रं फट् वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्मा
णि साधय स्वाहा शांतमंगलनाम्नेऽग्नये नमः इति मंत्रेण गंधाद्युपचारैरर्चयित्वा पुष्पांजलिं द
त्वा सप्तजिह्वाभ्यः स्वां मुद्रां दर्शयित्वा प्रणमेत् सप्तजिह्वामुद्रालक्षणं मणिबंधौ समौ
कृत्वा करौ प्रविततांगुली मध्यमेऽनामिके कृत्वा तन्मध्येंऽगुष्ठौ क्षिपेत् मुद्रेयं सप्तजिह्वाख्या प्रद
र्शयेज्जातवेदसे इति एवं कुंडे स्थंडिले वा पंचभूसंस्कारान् कृत्वा गेस्वगृह्योक्तं कर्म कुर्यात्

36 तद्यथा। अग्नेर्दक्षिणतः परिस्तरणभूमिमतिक्रम्य ब्रह्मासनं याज्ञियवृक्षोद्भवं पीठं। वा निधाय त्रिः
प्रागग्रैः कुशैस्तरणं विधाय ब्रह्माणमग्नेर्वायव्यां तस्य दक्षिणमानीय कल्पितासने वर्हिर्हस्तमुद
ङ्मुखमुपवेशयेत् प्रणीय ततोऽग्नेरुत्तरतः परिस्तरणभूमिमतिक्रम्य कुशत्रयेणासनद्वयं कल्पयि
त्वा तत्र चमसं सव्यहस्ते कृत्वा दक्षिणहस्तेनोद्धृतपात्रान्तरस्थोदकेन पूरयित्वा पश्चिमासने नि
धायालभ्य पूर्वासने स्थापयित्वा परिस्तीर्य वर्हिर्मुष्टिमादाय ईशानत आरभ्योदक्पर्यन्तमग्नेः प
रिस्तरणं कृत्वा॥ तद्यथा उपमूललूनवर्हिषां मुष्टिं चतुर्थभागेनाग्नेयादीशानान्तं प्राच्यां ब्रह्म
णोऽग्निपर्यन्तं दक्षिणस्यां नैर्ऋत्याद्वायव्यान्तं पश्चिमायां अग्नितः प्रणीतापर्यन्तमुत्तरस्यां ततो
र्थवदासाद्य आसादनमुपयोक्ष्यमाणानामग्नेरुत्तरतः प्रणीतापश्चिमे प्राक्संस्थमुदक्संस्थं
वा अग्नेः पश्चाद्वा तद्यथा पवित्रच्छेदनार्थं कुशत्रयं पवित्रार्थमनन्तर्गर्भिणं साग्रं कुशपवि ३६
त्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली चरुस्थालीद्वयं संमार्गकुशास्त्रयः उपयमनार्थं वेणीरूपकु

पात्रयं प्रादेश प्रमितपालाशसमिधत्रयं स्रुवः स्वादिरो हस्तमात्रः स्रुक्च आज्यं गव्यं त्रिः प्र
क्षालितास्तंडुलाः दुग्धं ब्रह्मदक्षिणार्थं पूर्णपात्रं वास्तुहोमार्थं सिद्धौदनं होतृदक्षिणार्थं वस्त्र
युग्मं सुवर्णकांस्यान्युपकल्पयेत् ततो वाग्यत आसादितपवित्रछेदनकुशपवित्रत्रयमादाय
पवित्रछेदनकुशैरग्रतः प्रादेशमात्रं विहाय द्वयोरुपरि त्रीन्निधाय कुशद्वयमूलेन कुशोपरि दक्षिणा दौ
कृत्य छित्वा तानपास्य पवित्राभ्यां प्रणीतोदकमुत्पूय प्रोक्षणीपात्रे प्रणीतासन्निधौ निधाय सप
वित्रकरेण प्रणीतोदकं च त्रिः प्रोक्षिण्यां निधाय पात्रांतरेण वा निक्षिपेत् उदगग्रपवित्रे स्वहस्त
योरंगुष्ठानामिकाग्राभ्यामन्तयोरादाय तन्मध्येन प्रोक्षिण्युदकं भूमौ त्रिः क्षिप्त्वा पवित्रे प्रोक्षिण्यां
निधाय तत्पात्रं दक्षिणहस्तेनादाय वामे निधाय दक्षिणहस्तानामिकांगुष्ठाभ्यां तज्जलं किंचिदू
र्ध्वमुत्क्षिप्य प्रणीताजलेन प्रोक्षणीरभिषिच्य तज्जलेन यथासादितद्रव्यं प्रत्येकं सकृत्प्रोक्ष्य तथा ५२
आज्यस्थाल्याः प्रोक्षणं चरुस्थाल्या० संमार्गकुशानां प्रो० उपयमनकुशानां० समिधां प्रो० स्रुवस्य०

स्रुचेः प्रो० आज्यस्य० तंडुलानां प्रो० पूर्णपात्रस्य प्रोक्षणं दक्षिणाद्रव्यस्य प्रोक्षणं एवं संप्रोक्ष्य पवित्रजल
37 सहितं प्रोक्षणीपात्रं प्रणीताग्न्योरंतरे निधाय तदेतु परिकल्पितसामान्यार्घोदकेन घृतादिहोमसाधनसं
भारं नमः श्रीभवायेति मंत्रेण प्रोक्ष्य आज्यस्थाल्यामाज्यं निरूप्य चरुस्थाल्यां तंडुलप्रक्षेपः तद्यथा ॐ रुद्राय
जुष्टं गृह्णामि वारत्रयं ३ चतुर्थं तूष्णीं ४ ॐ रुद्राय त्वा जुष्टं प्रोक्षामि वारत्रयं ३ चतुर्थं तूष्णीं ४ ॐ सूर्यादित्याभ्यो
मायवृधाय गरवे मुक्ताय शान्ते अमराय राहवे केतवे जुष्टं गृह्णामि ३। च० तूष्णीं एवं त्वा जुष्टं प्रोक्षामि ३। च० तूष्णीं
ततश्चरुपात्रद्वये प्रणीतोदकं दुग्धं च प्रक्षिप्य स्वयं चरुं ब्रह्मणा चाज्यं गृहीत्वा प्रदक्षिणीकृत्याग्निपूर्वेण
नीत्वा दक्षिणत आज्यमुत्तरतश्चरुः अपणार्थं युगपदग्नौ निधायोल्मुकं सह विष्फाग्नेः प्रदक्षिणं भ्रामयि
त्वा तत्रैव क्षिप्त्वा स्रुवं प्रतप्य स्रुवस्य प्रागग्रस्याधोमुखस्याग्नौ प्रतपनमुत्तानस्य संमार्जनं कुशैः अग्रतो
ग्रान्मूलपर्यंतं मध्यैरेवमधोदग्रपर्यंतं मूलैरेवं मूलादग्रपर्यंतं संमार्जनं प्रणीताद्भिरभ्युक्षणं पुनः
स्त्र प्रतपनं आवृत्तबर्हिषी स्वपुरतः प्रागग्रस्य स्थापनं दक्षिणतो वा निदध्यात् एवं स्रुचि प्रतापनं संमार्ज ३७
नं चा ।। ततः पाके वृत्ते स्वयमाज्यमुपाश्रिमेणानीत्वा आज्योत्तरे निधाय स्वपुरतः स्रुवोत्तरे आज्ये

विधाय २

स्रु २

वै १

तदुत्तरस्मिन्कुं निधाय एवमन्यानि त्रिचतुरादीनि हवींष्युद्वासयेत् अधिश्रितानां तु पूर्वेणोद्वासितानां तु प
श्चिमतो हवींष्युद्वास्यानपनुत्तमिति याज्ञिकसंप्रदायात् तदनु घृतं स्रुक्स्रुवौ च प्रत्येकं नमः शोभवापेत्यभिमंत्र्य धे
नुमुद्रया अमृतीकृत्यावगुंठनमुद्रयावगुंठ्य चक्रमुद्रया संरक्ष्य ततः स्रुक्स्रुवौ त्रिसूत्रवेष्टितग्रीवौ कृत्वा ततः कुशास्त स्व ३
रे देशे दक्षभागे निधाय इति संस्कारविशेषः उत्पूय प्रोक्षणीः ततः पवित्रेण समानीय आज्ये प्रोक्षणीवदुत्प
वनं विधाय पवित्रौ प्रोक्षण्यां निधायाज्यमवेक्ष्य सत्यपद्ध्वेन निरस्य प्रोक्ष्य एवमुत्पवनं विधाय प्रोक्षणीः पू
र्ववत् पुण्यजलैः पूरयित्वा उपयमनान्कुशानादाय होमसमाप्तिपर्यंतमुपयमनकुशैर्वामहस्तेनोपग्रहं
विधाय प्रजापतिं चिंतयन्नुत्तिष्ठन् प्रागग्रघृताक्तसमिधत्रयं प्रक्षिप्योपविश्य प्रोक्षणीभिः सहविष्कम
ग्निं प्रणीताब्रह्मसहितं प्रोक्ष्य एवमुदकेन सपवित्रेण चुलुकगृहीतेन ईशानादि उदक्पर्यंतं एवो हृदे
वरिति पर्युक्ष्य पवित्रे प्रणीतासु निधाय प्रोक्षणीपात्रं स्वस्थाने निदध्यात् होमशेषः स्रुक्स्रुवं तस्य धार
णं प्रणीतासु अन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं स्विष्टकृच्चेतन्नित्यमथ स

दक्षिण ३

प्राक्कूर्च्चुरग्नेर्दक्षिणभागे मनसा २

38

वेत्र प्राश्न महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धवि विनिस्तृत्रं स्मृतौच आचार्यस्य करे ब्रह्मादक्षिणां विधि
वत्सरशेत प्रतिमंत्रंजुहोसेवंपावदेनाश्म नुर्दश इति॥ तद्यथा॥ ब्रह्मणाकर वर्हिषान्वारब्धोदक्षिणांजा
नुंनमथित्वा प्रजापतयइतिमेधातिथिऋषिः प्रजापतिर्देवता गायत्री छंदः आघारहोमे विनियोगः ॐ प्रजा
पतयेस्वाहाः इदं प्रजापतये इंद्रायेतिप्रजा० ऋ० इंद्रोदेवतायजुछंदः आघारहोमे विनियोगः २(प्राक्कूर्च्चु
रग्नेर्दक्षिणभागेमनसा) आग्नेरुत्तरभागेक्रमाक्रु ॐ इंद्रायस्वाहा इदंमिंद्राय। अग्नयइतिमेधातिथि० इत्याघारसंज्ञकौ ५
अग्निर्देवताः गायत्रीछंदः आज्यभागहोमेवि० (इत्याघारसंज्ञकौ) ततउत्तरपूर्वार्द्धे ॐ अग्नयेस्वाहा इदमग्न०
सोमायेतिप्रजापतिऋ० सोमोदे० यजुछंदः आज्यभागहोमेविनियोगः २४
ततोदक्षिणपूर्वार्द्धे ॐ सोमायस्वाहा इदंसोमाय इत्याघारावाज्यभागौमसंस्रवंहुत्वा अथईशानेरुद्र
कलशस्थापनं ततोयजमानः ईशाने उपविश्याचम्य प्राणानायम्य॥ तिथ्यादि सं० कीर्त्य गोत्रोऽमुकशर्मा
हं सग्रह(स्थापन)श्रीरुद्रयागारव्यकर्मणिरुद्रकुंभस्थापनमहंकरिष्ये इतिसंकल्प्य तद्वेदोकलशोत्पत्तिं ३८
पवित्वाकलशंमंत्रैकलशस्थापनं कुर्यात् तत्सर्वंवाशिष्ठीशांतौद्रष्टव्यं॥ इतिकलशस्थापनं॥ ततोभू
स्थापन १

रादिदशाहुतयः अग्नितः पश्चादुपविश्य हस्ते जलं गृहीत्वा ॐ भूरादिव्याहृतीनां प्रजापतिरृषिर्गायत्र्युष्णिग
नुष्टुप्छंदांसि अग्निर्वायुसूर्या देवता अन्वाधाने आज्यहोमे विनियोगः ॐ भूः स्वाहा इदमग्नये १ ॐ भुवः स्वाहा
इदं वायवे २ ॐ स्वः स्वाहा इदं सूर्याय ३ ॐ त्वन्नो अग्ने स त्वन्नो अग्ने इति द्वयोर्वामदेव ऋषिः त्रिष्टुप्छं
दः अग्निवरुणौ देवते त्रिपशौहोमे विनियोगः ॐ त्वन्नो ऽग्ने० स्वाहा इदमग्नीवरुणाभ्यां ॥४॥ ॐ स त्वन्नो ऽग्ने
ऽवमो० स्वाहा इदमग्नीवरुणाभ्यां ॥५॥ अयाश्चाग्न इति वामदेव ऋषिरग्निर्देवता त्रिष्टुप्छंदः सर्वप्राय
श्चित्तहोमे वि० गः ॐ अयाश्चाग्ने० स्वाहा इदमग्नये ६ ॐ ये ते शतमिति वामदेव ऋषिर्वरुणसवितृविष्णु
र्विश्वमरुत्स्वर्का देवता त्रिष्टुप्छंदः सर्वप्रायश्चित्तहोमे विनियोगः ॐ ये ते शतं वरुणं० स्वाहा इदं वरुणाय
सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ७ ॐ उदुत्तममिति शुनःशेप ऋषिर्वरुणो देवता त्रिष्टुप्छं
दः पाशान्मोके विनियोगः ॐ उदुत्तमं वरुण पाशमस्म० स्वाहा इदं वरुणायादितये ८ ॐ प्रजापतये स्वाहा
इदं प्रजापतये ९ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते १० इत्याहुतीर्हुत्वा स्वदेहे न्यासं कुर्यात् पंच

लोकपालादीन्स्थापयेत् तद्यथा मंडपैशानकोणे हस्तमात्रे पीठे सूर्यादिग्रहस्थापनार्थं गत्वा प्राङ्मुखोप
३९ विश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य गोत्रोऽमुकशर्माहं ब्राह्मणद्वाराकारितस्य श्रीमहारुद्रजपस्य
सांगतासिध्यर्थं जपदशांशसंख्यया होमसग्रहयज्ञ श्रीमहारुद्रयागाख्ये कर्मणि गणपत्यादिसकललोकपाला
देवता नां सूर्यादिनवग्रहाणां मधिदेवताप्रत्यधिदेवतासहितानां विनायकादिपंचलोकपालादिदिक्कुल्प्य पालयं
यथाश त्रानां नेन यथा मिलितोपचारैर्यथामत्या स्थापनप्रतिष्ठापूर्वकं पूजनमहं करिष्ये इति संकल्प्य॥ हरस्य
तनुसंभूतेत्यादि अनेनानां स्थापनपूजनं सर्वेषां सिद्धीशांतिलिंगैः कुर्यात् ॥इतिग्रहपूजनं समाप्तं॥ अथपी ।रिप-
ठपूजनं अथ मध्यवेद्याः पूर्वे द्विहस्तमात्रं रुद्रपीठं तत्रागत्य पूर्वाभिमुखः स्वासने उपविश्य आचम्य प्राणा
नायाम्य देशकालौ स्मृत्वा॥ गोत्रोऽमुकशर्माहं अमुककामनासिध्यर्थं ब्राह्मणद्वाराकृतस्य श्रीमहारुद्र
जपस्य दशांशसंख्यया होमकर्मसग्रहरुद्रयागसिध्यर्थं श्रीमहारुद्रपीठस्थापनानिमित्तं लिंगतोभद्रमंड
ले ब्रह्मादिदेवतानां सकलशानां स्थापनपूजनमहं करिष्ये ।लिंगतोभद्रमंडले देवानावाह्य प्रतिष्ठाप्य॥ ३९

पाद्यादियथासंभवोपचारैः संपूज्य प्रणमेत् अथ तन्मध्ये कलशस्थापनमंत्रैः दृढं नवीनमच्छिद्रं ताम्रमयं कलशं
संस्थाप्य ॥ कलशप्रार्थनादि पूजांतं सर्वं समाप्य ॥ तदुपरि पट्टवस्त्रे चंदनादिना लिखितं श्रीमहारुद्रयंत्रं संस्था
प्य ॥ ततो रुद्रयंत्र यंत्रेणाऽपूजितो देवः सहस्रानप्रसीदति सर्वेषामपि मंत्राणां यंत्रे पूजा प्रशस्यते यंत्रं मंत्रम
यं प्रोक्तं यंत्रात्मा देवतेति च इत्यागमवचनात् प्रधानदेवतापूजने पीठपूजाऽऽवरणपूजादिवद्यंत्रपूजनस्या
वश्यकत्वात् यंत्रप्रकारश्च स्कंदपुराणे स्कंदमहादेवसंवादे प्रदर्शितः प्रणम्य जगतामीशामित्यादिना च स एव
प्रकारः प्राचीनरुद्रकल्पादौ प्रदर्शितः स एवात्र प्रदर्श्यते ॥ प्रणम्य जगतामीशमुमादेहार्द्धधारिणं यंत्रोद्धारं महा
रुद्रे वक्ष्ये कल्पानुसारतः मध्ये वृत्तं समालिख्य तन्मध्ये च दशाक्षरं ॐ नमो भगवते रुद्रायेति दशाक्षरः तद्बा
ह्येऽष्टदलं वृत्तं ततः षोडशपत्रकं चतुर्विंशतिपत्राढ्यं द्वात्रिंशत्पत्रकं तथा चत्वारिंशद्दलं चैव वृत्ते सूर्यसमप्रभं
पंचपद्मात्मकं वृत्तं चतुरस्रं च भूगृहं सत्वरजस्तमश्चेति त्रिगुणैः परितो वृतं चतुर्द्वारं द्वारदेशे वह्निर्नागसमावृ
ते रुद्रपीठमिति ख्यातं देवतास्तत्र विन्यसेत् चत्वारिंशच्छतं चैकं देवतानामुदाहृतं परितः कर्णिकामध्ये रु

इयंत्रं सभालिखेत् ॐ नमो भगवते रुद्राये निता रादिकं न्यसेत् सोयं दशाक्षरो मंत्रः सर्वकामार्थसिद्धिदः प्रणवा
दिनमोंतानि पंचास्यानि ततः परं मित्यलं कुंकुमागरुकर्पूरैर्भूर्यपत्रे तथायटे पट्टवस्त्रे लिखित्वा कलशे तद्यंत्रं
निधापयेत्।। आचम्य दशाक्षरेण मंत्रेण प्राणानायम्य तत्र त्रीन् कुशान्पूर्वाग्रान्स्ताम्रपात्रे निधाय तस्मात्रे ज
लेपूरयित्वा गंधादिकं च तत्र प्रक्षिप्य पूर्ववत् अंकुशमुद्रया सूर्यमंडलात्तीर्थान्यावाह्य दशाक्षरेण मंत्रेण त
ज्जलं त्रिवारमभिमंत्र्य आत्मानं मूलेन दर्भैः संप्रोक्ष्य त्रिपुंड्रं कुर्यात् तद्यथा भस्महस्ते गृहीत्वा स्वपुरतो निधा
य सद्योजातादि पंच पंचब्रह्ममंत्रैर्भस्माऽभिमंत्र्य कूर्ममुद्रया मंत्रा यथा ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः सद्यो
भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः १ ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः काला
यनमः कलविकरणाय नमो बलाय नमो बलिविकरणाय नमो बलप्रमथप्रथनाय नमः सर्वभूतदमनाय नमो मनो.
न्मनाय नमः २ ॐ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्वशर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः ३ ॐ.
तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ४ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ४०

सदाशिवोम् ५ ॐमग्निरितिभस्म वायुरितिभस्म जलमितिभस्म स्थलमितिभस्म व्योमेतिभस्म सर्वंवा
वाइदंभस्मेत्यभिमंत्र्यविभूतिस्नानंकुर्यात् तद्यथा ॐतमीशानंजगतस्तस्थुषः० इतिशिरसि १ ॐयस्युरुंव्यद
धुः इतिमुखे २ ॐयातेरुद्रेतिहृदये ३ ॐवाममद्यंतवितरितिऊर्वोः ४ ॐसद्योजातोव्यमिमीनमग्निरितिपाद
योः ५ प्रवणेनसर्वांगेषुविन्यसेत् ततस्त्रिपुंड्रंलिखेत् तत्रविधिः अंगुष्ठानामिकातर्जनीभिर्गृहीत्वाशि
रःपरितोहस्तंभ्रामयित्वा प्रथममधोरेखामनामिकया द्वितीयांतर्जन्या तृतीयांगुष्ठेन एवंललाटेरेखा
त्रयंकृत्वा पुनर्ललाटे ॐब्रह्मणेनमः हृदये ॐहव्यवाहनायनमः नाभौ ॐस्कंदायनमः गले ॐपूष्णेनमः
दक्षभुजे ॐ[illegible] रुद्रायनमः तन्मध्ये ॐमादित्यायनमः तन्मणिबंधे ॐवसुभ्योनमः वामभुजे ॐवामदेवायन
मः तन्मध्ये ॐप्रभंजनायनमः तन्मणिबंधे ॐशशिनेनमः पृष्ठे ॐहरयेनमः अपरगले ॐनीलकंठायनमः
शिरसि ॐसदाशिवायनमः इतित्रिपुंड्रविधिः शिवोभूत्वाशिवंयजेदित्याद्यागमवाक्यानीतितस्मात् सदाशिव
चिद्रूपस्त्रिपुंड्रादिधारणंविधाय आदिशब्देनरुद्राक्षादीनांग्रहणं शिवोहमितित्रिःपठित्वा नेतस्वात्मनिस

वा॰ शां॰ दा शिवपूजायोग्यत्वं संपाद्य शिवं पूजयेत् इति असौ यस्ताम्र इति मंत्रेण श्रीरुद्ररूपाय सूर्याय अर्घं नियोजयेत् त
५१ था ताम्रमयार्घपात्रे गंधाक्षतपुष्पजलादिकं निक्षिप्योत्थायार्घपात्रं हस्तद्वयसंपुटेन गृहीत्वा ॐ असौ य
स्ताम्रो ऽअरुण॰ एषोऽर्घः श्रीरुद्ररूपाय सूर्याय नमः इत्यर्घं दद्यात् ततोपविश्य क्षेत्रशुद्धिं कुर्यात् ॐ रसीति
प्रजापतिऋषिः प्रस्तारपङ्क्तिश्छन्दः स्वयमातृणा देवता भूशुद्ध्यर्थं जपे विनियोगः ॐ भूरसि भूमिरस्यदिति
रसि इति मंत्रपाठः ॐ ये भूतानीत्यस्य कौण्डिन्यऋषिः नारायणो देवता पङ्क्तिश्छन्दः क्षेत्रशुद्धौ भूतादिप्रार्थ
ने विनियोगः ॐ भैरवाय नमः इति भैरवं नत्वा ततो दशाक्षरेण मंत्रेण वामभागे सामान्यार्घं शंखोदकं संस्थाप्य
अनेनैव मंत्रेण स्वदक्षिणे पुष्पादि सर्वं पूजोपस्करं संस्थाप्य शंखोदकेनात्मानं संप्रोक्ष्य ततो मुष्ट्या गृहीतसर्ष
पैर्भूतानुत्सारयेत् तत्र मंत्राः रक्षोह रक्षसां भो रक्षोहा विश्वचर्षणिः एतान् मंत्रान् पठित्वा श्लोकं च पठेद्
अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ह्रीं फट् स्वाहेति मंत्रेण शं
खमुद्रया त्रिर्भ्रामयित्वा दक्षिणतो निक्षिपेत् सर्वभूतानि नष्टानि इति विचिंतयेत् ततः कवचेनात्मानमवगुण्ठ्य

अस्त्रेण संरक्ष्य शिवात्मनो रैक्यं भावयित्वा ततो दशाक्षरेण मंत्रेण प्राणायामत्रयं कृत्वा हस्ते जलं गृहीत्वा ॥
देशकालसंकीर्तनांते गोत्रोऽमुकशर्माहं अमुकनामसिद्ध्यर्थं ब्राह्मण द्वारा कृतस्य महारुद्रजपस्य तद्दशांश संख्यया
होमकर्मसग्रह रुद्रयागाख्ये कर्मणि देहशुध्यर्थं श्रीमहारुद्रपूजनस्याधिकारार्थं भूतशुद्ध्यादि वैदिक षडंग रुद्रन्या
स पूर्वकं यथाज्ञानेन यथा मिलितोपचारैर्यथामत्या श्रीमहारुद्रपूजनमहं करिष्ये तत्र प्रथमं भूतशुद्धिं प्राणप्रति
ष्ठां मातृकान्यासं च कृत्वा अष्टांगप्रणामपर्यंतं रुद्रपूजनं जय्योमुक्तं न्यादिकं विधाय ततः स्ववामाग्रे चतुर वैदिक न्या
स्रवृत्त त्रिकोणात्मकं मंडलं जलेन च गोमयेन वा विलिख्य ॐ ह्रीं आधारशक्तये नमः इति गंधाक्षतपुष्पैः
संपूज्य तदुपरि प्रक्षालिताधारपात्रं त्रिपादिकारूपं संस्थाप्य तत्र मं दशकलात्मने वन्हिमंडलाय नमः इत्यक्ष
तपुष्पैः पूजयित्वा वृत्ताकारेण वह्नेः ईशकलाः पूजयेत् यं धूम्रार्चिषे नमः रं ऊष्मायै ज्वलिन्यै वं ज्वा
लिन्यै शं स्फुलिंगिन्यै षं सुश्रियै सं सुरूपायै हं कपिलायै लं हव्यवाहनायै नमः क्षं कव्यवाहनायै इति संपू
ज्य तदुपरि अस्त्राक्षालितं शंखं संस्थाप्य तत्र द्वादशकलात्मने सूर्यमंडलाय नमः इति संपूज्य वृत्ताकारेण

वा॰प्रा॰ तत्र द्वादशकलाः पूजयेत् कंभं ज्ञापिन्यै नमः खंबं तापिन्यै नमः गंफं धूम्रिन्यै नमः घंपं मरीच्यै नमः ङंनं ज्वालिन्यै
42 नमः चंधं रुच्यै नमः छंदं सुषुम्णायै नमः जंथं भोगदायै नमः झंतं विश्वायै नमः ञंणं बोधिन्यै नमः टंढं धारिण्यै
नमः ठंडं क्षमायै नमः इति पूजयेत् तत्र हृदयमन्त्रेण गंधपुष्पाणि क्षिप्त्वा ओं क्षं नमः इति सूर्यापि लं सं षं शं वं हं
लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं लृं ॠं ऋं ऊं उं ईं इं आं अं इ
ति विलोममातृकां जपन् सुधाबुद्ध्या शंखं जलेनापूर्य जलमध्ये ओं षोडशकलात्मने सोममण्डलाय नमः इति
संपूज्य वर्त्ताकारेण चंद्रस्य षोडशकलाः पूजयेत् अं अमृतायै नमः आं मानदायै नमः इं पूषायै नमः ईं तुष्ट्यै
नमः उं पुष्ट्यै नमः ऊं धृत्यै नमः ऋं रत्यै नमः ॠं शशिन्यै नमः लृं चंद्रिकायै नमः ॡं कान्त्यै नमः एं ज्योत्स्नायै नमः
ऐं श्रियै नमः ओं प्रीत्यै नमः औं अंगदायै नमः अं पूर्णायै नमः अः पूर्णामृतायै नमः इति जले अभ्यर्च्य अत्र अमृतादिक
लानां प्राणप्रतिष्ठां विधायेति केचित् अं कुशमुद्रया सूर्यमंडलात्तीर्थमावाह्य मूलमंत्रेणार्घ्यजलेन संयोज्य
मूलमंत्रेण लिंगमुद्रां प्रदर्श्य तल्लक्षणं उच्छ्रितं दक्षिणांगुष्ठं वामांगुष्ठेन बाधयेत् वामांगुलिर्दक्षिणाभिरं 42
गुलीभिश्च वेष्टयेत् लिंगमुद्रेयमाख्याता शिवसान्निध्यकारिणी इति॥ वमिति धेनुमुद्रया अमृतीकृत्य॥

तत्र देवं ध्यात्वा शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकं गंधरं दशभुजं सर्वाभरणभूषितं नीलग्रीवं शशांकां
कं नागयज्ञोपवीतकं व्याघ्रचर्मोत्तरीयं च वरदमभयप्रदं कमंडल्वक्षसूत्राभ्यामन्वितं शूलपाणिनं ज्वलंतं पिं
गलजटाजूटमग्रोत्तकारिणं अमृतेनाप्लुतं हृष्टं उमादेहार्द्धधारिणं दिव्यसिंहासनासीनं दिव्यभोगसमन्वितं
दिग्देवतासमायुक्तं सुरासुरनमस्कृतं नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययं सर्वव्यापिनमीशानं रुद्रं वै विश्व
रूपिणमेवं ध्यात्वा तत्र मूलेन षडंगं विधाय ॐ ॐ हृदयाय ॐ नमः शिरसे स्वाहा ॐ भगशिखायै वषट् ॐ
वते कवचाय हुं ॐ रुद्राय नेत्रत्रयाय वौषट् ॐ यं अस्त्राय फट् इति षडंगं विधाय कवचेनावगुंठ्य कवचेनैव वीक्ष
णं शंखमुद्रया तत्पात्रमवष्टभ्य योनिमुद्रया तज्जलं स्पृष्ट्वा मूलेन गंधादिभिस्तत्रैव देवं संपूज्य प्राग्वत् षडंगानि
संपूज्य मूलमंत्रेणाष्टवारमभिमंत्र्य मत्स्यमुद्रयाच्छादयेत् तत्पात्रस्यांतरतः पद्माकारेण त्रिकोणमंडलत्रयं कृ
त्वा तेषु मंडलद्वये साधारं सजलपात्रद्वयं संस्थाप्य तृतीयत्रिकोणे घृतमधुदधियुक्तं कांस्यपात्रं संस्थाप्य
मूलमंत्रेण गंधाक्षतपुष्पैः पृथक् पृथगभ्यर्च्य तेषु त्रिषु पात्रेषु पात्रांतरेणोद्धृत्यार्घजलं किंचित् किंचित् दत्त्वा

वा॰शो 43

मूलमंत्रेण तानि पात्राणि प्रपूर्य करयुगाष्टवारमभिमंत्र्य मत्स्यमुद्रया छादयेत् तेषु पात्रत्रयेषु प्रथममर्घ्यपात्रे
श्यामाकदूर्वाब्जविष्णुक्रांतानि निक्षिप्य द्वितीये आचमनीयपात्रे जातीफललवंगकंकोलचूर्णानि निक्षिपेत्
अत्रार्घ्यादिद्रव्यालाभे प्रक्षालितास्तंडुलाः पुष्पाणि वा दद्यात् ततः पूजाचक्रस्य दक्षिणे त्रिकोणं कृत्वा ॥ तत्र
प्रक्षालितं साधारस जलं पुनराचमनपात्रं निधाय तत्रार्घ्यपात्रे जलं किंचित्पात्रांतरेणोद्धृत्य दत्वा मूलमंत्रेण
अष्टवारमभिमंत्र्य मत्स्यमुद्रया छादयेत् तथैव तत्समीपे प्रोक्षणार्थं पात्रांतरं संस्थाप्य अर्घ्यपात्रजलं किंचित्पात्रां
तरेणोद्धृत्य दत्वा तज्जलेन स्वात्मानं पूजाद्रव्याणि पूजाचक्रं च मूलेन संप्रोक्ष्य स्वदेहं गंधपुष्पैरलंकृत्य स्वस्व
देवतारूपं संचिंत्य मूलेन त्रिः स्वशिरसि पुष्पांजलिं दत्वा गंधपुष्पधूपदीपनैवेद्यानि मनसा निवेद्य देवरूपः
सन्यथाशक्ति मूलं जप्त्वा गुह्यातिगुह्यगोप्ता त्वमिति देवाय जपं निवेद्य हस्तं प्रक्षाल्य पीठं पूजयेत्
तद्यथा देवदक्षिणे गुं गुरुभ्यो नमः पं परमगुरुभ्यो नमः पं परात्परगुरुभ्यो॰ पं परमेष्ठीगुरुभ्यो नमः इति संपू
ज्य भूपुरे आग्नेयादिचतुष्कोणेषु गं गणपतये नमः दुं दुर्गायै नमः क्षें क्षेत्रपालाय नमः सं सरस्वत्यै नमः पश्चिमे त्रि ४३

(गुं वगुरुभ्यो॰ परमगुरुभ्यो॰ परात्परगुरुभ्यो॰ परमेष्ठीगुरुभ्यो॰)

गुरुभ्यो नमः। शिवगुरुभ्यो॰ अस्मद्गुरुभ्यो॰ परमगुरुभ्यो॰ परमेष्ठीगुरुभ्यो नमः द्वारशाखयोः गंगायै नमः यं यमुना
यै॰ देहल्यां देहल्यै नमः यंत्र द्वारे द्वारश्रियै नमः कर्णिकायां वास्तुपुरुषेभ्यो॰ सुवर्णवर्णाय सर्वदैवशाय॰
ओं ह्रीं आधारशक्त्यै॰ मूलप्रकृत्यै॰ ओं मंडूकाय॰ ओं कं कालाग्निरुद्राय॰ कुं कूर्माय॰ ओं हूं वाराहाय॰ ओं अं अ
नंताय॰ ओं यं पृथिव्यै॰ ओं कं कंदाय नमः ओं अं अंकुशाय॰ ओं नं नीलांकुशाय॰ ओं पद्माय॰ इति संपूज्य पद्मोपरि
पं पत्रेभ्यो॰ कं केसरेभ्यो नमः कं कर्णिकायै॰ महासनाय रत्नसिंहासनाय॰ प्रागादिषु शुभ्रवर्णाय॰ अधर्माय॰ शुभ्रवर्णाय
अज्ञानाय॰ तमोरूपाय॰ अवैराग्याय॰ धूम्रवर्णाय॰ अनैश्वर्याय नीलजीमूतश्वेतवर्णाय॰ इति संपूज्य॥ आ वर्णाय
ग्नेयादिकोणेषु ओं गं धर्माय॰ रक्तवर्णा॰ ओं ज्ञानाय॰ अनंताय॰ ओं वैराग्याय॰ कुंदेंदुगौराय॰ ओं ऐश्वर्याय॰ शुभ्रवर्णाय
मध्ये सं सत्वाय श्वेतरूपधराय नमः रं रजसे रक्तवर्णाय नमः तं तमसे कृष्णवर्णाय नमः लं अग्निमंडलाय॰ ओं
उं सोममंडलाय॰ अं सूर्यमंडलाय॰ इति मध्ये अथ प्रागादि मायातत्वाय॰ पूर्वे ओं कलातत्वाय॰ दक्षिणे ओं
ओं विद्यातत्वाय॰ ओं पश्चिमे॥ ओं शिवतत्वाय॰ उत्तरे अथाग्नेयादि अं आत्मने नमः आग्नेय्यां अं अंतरात्मने नमः

वा·शां· नैर्ऋत्यां॥ ॐ जीवात्मने· वायौ ॐ परमात्मने· ईशाने अथाष्टदिक्षु पू॰ ॐ रुद्रायनमः आग्नेयां॥ ॐ शर्वाय
55 नमः दक्षिणे पशुपतयेनमः नैर्ऋते उग्रायनमः पश्चिमे अशनये· वायौ भवाय· उत्तरे महादेवायनमः ईशा
ने ईशानायनमः पुनः प्राच्यादिदिक्षु ॐ वामायै॰१ ॐ ज्येष्ठायै·२ ॐ रौद्र्यै·३ ॐ काल्यै·४ ॐ कलविकरण्यै·५
ॐ बलविकरण्यै·६ ॐ बलप्रमथन्यै·७ ॐ सर्वभूतदमन्यैनमः·८ मध्ये ॐ मनोन्मन्यैनमः ॐ नमोभगवते स
कलगुणात्मकशक्तियुक्तायानंतयोगपीठायनमः इति पीठपूजा ततः शिवपूजनं सुवर्णनिर्मितां शिवमूर्त्तिं
तथा शिवामूर्त्तिं रजतनिर्मितं वेदिकेश्वरमूर्त्तिं च ताम्रपात्रे निधाय हस्ते जलं गृहीत्वा देशकालौ संकीर्त्य गोत्रो
अमुकशर्माहं ममाऽमुककामनापरिपूर्णार्थं ब्राह्मणद्वारा कारितस्य श्रीमहारुद्रजपस्य तद्दशांशसंख्या
या होमकर्मणि ग्रहयज्ञकर्मणि श्रीमहारुद्रस्य सशक्तिकस्य सवाहनस्य च [illegible] सांमूर्त्तीनां लोहाभिघातज
न्यदोषनिरसनम अग्न्युत्तारणपूर्वकं प्राणप्रतिष्ठां च करिष्ये ततः अथ ॐ सोमव्रते इत्याद्यष्टभिर्ऋग्भिः जलं
धारया संस्थाप्य॥ इति लोहोत्तारणं अथ ॐ समुद्रस्यत्वावकयाग्ने इत्यारभ्य प्राणदा अपानदा इत्यंत

करणमुद्रया परमीकरणं। अन्योन्यग्रथितांगुष्ठौ प्रसारितपरांगुलिः। महामुद्रेयमाख्याता परमी -४

इदमेव सकलीकरणं ॐ सकलीकरोमि सकलीकृतो भव। अथावगुंठनमुद्रयावगुंठनं कुर्यात् सव्यहस्तेकृतामु
ष्टिदीर्घाधोमुखतर्जनी अवगुंठनमुद्रेयं त्वमितोऽभिमता अवगुंठितो भव।। ततो धेनुमुद्रयाऽमृतीकरणं
अन्योन्याभिमुखश्लिष्टेकनिष्ठानामिके पुनः तथा तु तर्जनीमध्ये धेनुमुद्रा समीरिता ॐ अमृतीकरोति।।
अमृतीकृतो भव। ततः परमीकरणे बुधैः प्रयोजयेदिमां मुद्रां देवतायागकर्मणि ॐ परमीकृकरोमि परमीकृ
तो भव एवमावाहनादिमुद्रां प्रदर्श्य अत्र विशेषः कल्पलतायां चित्रदेवानामिति मंत्रेण नेत्रोन्मीलितं भावं
यित्वा देवाग्रेपायसादिवहुनैवेद्यं निधार्य दर्शं दर्शयित्वाजीवन्यसेदिति मूलमुच्चार्य।। एवं दत्वववादिनि।।
ऐं क्लीं ह्लि न्ले क्लो दिनिक्लेदय महाक्षोभं कुरु २ क्लीं सौं मोक्षं कुरु २ सौं ह्लौं इति दीपिनीकां अदादि सकारांतो मात
कां चोच्चार्य अर्घोदकेन देवं त्रिःप्रोक्ष्य देवस्य हृदयं स्पृशन् प्राणप्रतिष्ठां कुर्यात्।। सा यथा ॐ मस्य श्री प्राणप्रति
ष्ठामंत्रस्य ब्रह्माविष्णुरुद्रऋषयः ऋग्यजुःसामानि छंदांसि पराप्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कील
कं श्रीमहारुद्रस्य सशक्तिकस्य सपरिवारस्य प्राणप्रतिष्ठान्यासे विनियोगः ॐ आं ह्रीं क्रों यं रं लं वं शं षं सः सोऽहं

बो॰ शा॰ क्रों ह्रीं आं देवस्य महारुद्रस्य सशक्तिकस्य सपरिवारस्य प्राणा इह प्राणाः पुनरेवं महारुद्रस्य सशक्तिकस्य सप
48 रिवारस्य जीव इह स्थितः पुनरेवं पठित्वा । शिवस्य सर्वेन्द्रियाणि पुनरेवं शिवस्य वाङ्मनश्चक्षुश्श्रोत्र जिह्वा घ्राण
प्राण प्राणा इहागत्य सुखं सुचिरं तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठां कृत्वा अथासनं विश्वेश्वर महाराज प्रियेश्वर
प्रजायते आसनं दिव्यमीशान दास्येहं परमेश्वर नमस्ते रुद्रमन्यव॰ सांगाय सपरि॰ सश॰ श्रीमहारुद्राय॰ आ
सनं समर्प्पयामि ॥२॥ अथ कटिसूत्रं ॐ यामिषुं गिरिशं॰ मूलेन श्रीमहारुद्राय॰ कटिसूत्रं समर्पयामि ३ ॐ
शिवेन वचसा त्वा॰ मूलेन श्रीमहारु॰ वस्त्रं समर्प्पयामि ४ अध्यवोचदधिवक्ता॰ मूलेन॰ श्रीमहारुद्राय॰
द्वितीयवस्त्रं स॰ ५ ॐ असौ यस्ताम्रोऽअरुण॰ मूलं श्रीमहारुद्राय॰ देवतान्यासं स॰ मि ६॥ ॐ असौ यस्ताम्रोऽ
अरुण॰ मूलं श्रीमहारुद्राय अवसर्प्पणं समर्प्पणं स॰ मि ॥ ॐ महानन्द महेशान महदानन्ददायक पाद्यं
गृहाण देवेश पार्वतीपतिमीश्वर ॐ नमोस्तु नीलग्रीवाय॰ मूलं॰ श्रीमहारुद्राय॰ पाद्यं स॰ ८ ॐ त्रियं
वकसदाधारवियदादिविधानक अर्घ्यं गृहाण देवेश शंभो सर्वार्थसाधक ॐ तत्सवितुर्वरेण्यं भ॰ मूलं ४६

दि१

श्रीमहारुद्राय॰ अर्घ्यं स॰ ९ ॐत्रिपुरांतकदीनार्त्तिनाशन् श्रीकंठशूलधृक् गृहाणाचमनंचारुपवित्रो
दककल्पितं ॐत्र्यंबकंयजामहेसुगंधिं॰ मूलं श्रीमहारुद्राय॰ अर्घ्यंते आचमनं स॰ ॥१०॥ सर्वकालुष्य
हीनाय परिपूर्णसुखात्मने मधुपर्कमिदंदेवकल्पयामिप्रसीदमे ॐयन्मधुनोमधव्यं॰ मूलं श्रीमहारु
द्राय मधुपर्कं स॰ ॥११॥ अथ पंचामृतस्नानं ॐसुरभीसारसंभूतंकुंदेंदुधवलंपरं पयस्नानंमहादेवधा
रोस्वंप्रतिगृह्यतां ॐपयः पृथिव्यामितिलुषोघानाकऋषिर्विराडनुष्टुप्छंदः रुद्रोदेवतापयस्नानेविनि
योगः ॐपयः पृथिव्यां॰ मूलं॰ श्रीमहारुद्राय॰ पयस्नानं स॰ मि॥ शुद्धोदकस्नानं ॐवरुणस्योत्तंभनमसि॰
मूलं॰ श्रीमहारुद्राय॰ पयस्नानांतेशुद्धोदकस्नानं स॰ पंचोपचारैःसंपूज्य॥ दधिस्नानंकुर्यात्॥ शुभ्रंतलशी
तलंचैवकपित्थकसुगंधकं दधिस्नानंमहादेवगृह्यतांमयासह १ ॐदधिक्राव्णइतिवामदेवोदधि
क्राव्णऋषिः रुद्रोदेवता गायत्री छंदः दध्नास्नापनेविनियोगः ॐदधिक्राव्णो॰ मूलं॰ श्रीमहारुद्राय॰
दधिस्नानं स॰ शुद्धस्नानं पंचोपचारैःसंपूज्य। मधुस्नानंकारयेत् सर्वौषधीनांसारेहिपूरितं नूतनेघ
टेमधुस्नानंमहादेवगृहाणमुरनुग्रहात् ॐमधुवाताइतिरुचस्यगोतमऋषिः रुद्रोदेवतागाय

वा॰ सो॰ त्री छंदः मधुनास्नापने विनियोगः ॐ मधुवाता॰ १ ॐ मधुनक्तमुतोषसो॰ २ ॐ मधुमान्नो वनस्पतिः
४७ मूले॰ श्रीमहारुद्राय॰ मधुस्नानं स॰ मि॥ शुद्धोदकं पंचोपचारैः संपूज्य॥ ॐ घृतस्नानं कुर्यात् घृतस्नानं
महादेव कर्पूरामोदसंयुतं गृहाण कृपया शंभो कपिलस्वर्णसन्निभं १ ॐ घृतं घृतपावान इति हविरसिस्वा
हेत्यंतस्य यजुषः प्रजापतिऋषिः रुद्रो देवता ऋचां पंक्तिश्छंदः घृतस्नाने विनियोगः ॐ घृतं घृतपावा
न॰ रसि स्वाहा मूले श्रीमहारुद्राय॰ घृतस्नानं स॰ शुद्धोदकस्नानं पंचोपचारैः संपूज्य शर्करास्नानं
कारयेत् ॐ इक्षुसारसमुद्भूतं हिमकुंदशशिप्रभं शर्करामानदेवेश गृहाण परमेश्वर ॐ मपाꣳ रसि
मिति इंद्राबृहती ऋषिः अनुष्टुप् छंदः रुद्रो देवता शर्करायास्नापने विनियोगः ॐ मपाꣳ रसमुद्वय
सꣳ सूर्ये स॰ मूले॰ श्रीमहारुद्राय शर्करास्नानं स॰ शुद्धोदकस्नानं पंचोपचारैः संपूज्य ततः प्रणव
पूर्वकैर्न्यासमंत्रैर्मा नस्तोक इत्यृच शंभवायेति चैतैर्मंत्रैर्गंधोदकेन स्नापनं कुर्यात्॥ ते च स्नानमंत्राय
या इममेवरुणश्रुधीहव॰ १ यातेरुद्रशिवातनूरघोराया॰ २ अस्मिन्महत्यर्णवेंतरिक्षे॰ ३ असं ४९

ख्यातासहस्राणि ०४ त्र्यंबकंयजामहे ०५ मानस्तोकेतनये ०६ अवतत्यधनुस्त्वं ०७ नीलग्रीवा ०८
नमस्तेऽस्त्वायुधाया ०९ येतीर्थानिप्रचरंति ० १० नमोवः किरिकेभ्योदेवानांहृं ०११ नमोहिरण्यबाहवे ०
१२ इमारुद्रायतवसे ०१३ मानोमहांतमुत ०१४ एषतेरुद्रभागः १५ अवरुद्रमदी ०१६ अध्यवोचदधिवक्ता
०१७ नमोविल्मिनेचक ०१८ नमोस्तुनीलग्रीवायसह ०१९ प्रमुंचधन्वनस्त्व ०२० यएतावन्तश्चभूयां
सं ०२१ ॐनमोभगवतेरुद्राय २२ इतिन्यासमंत्राः मानस्तोकेतनये इति २३ ॐनमः शंभवायचमयो
भवायचनमः ०२४ इतिमंत्रैर्देवं गंधोदकेन स्नापयित्वा मूले० श्रीमहारुद्राय० महाभिषेकस्नानं
स० नमस्तेरुद्रमन्यु ०१ यातेरुद्रशिवातनूः ०२ यामिषुंगिरिशंतहस्ते ०३ शिवेनवचसा त्वा ०४ अध्यवो
चदधिवक्ता ०५ असौयस्ताम्रोअरुण ०६ असौयोवसर्पति ०७ नमोस्तुनीलग्रीवायसहस्रा ०८ इत्येते
रष्टभिर्मंत्रैर्जलपूरितै ~~आगच्छभगवान्देवस्थानेचात्रस्थिरोभव यावत्पूजासमाप्येततावत्त्वंसन्निधोभव~~
रष्टकुंभैः स्नापयित्वा ॐदेवस्यत्वासवितु ०१ पंचनद्यः सरस्वती ०२ वरुणस्योत्तंभनमसि ०३ इतिशुद्धो

क

वा॰ प्रो॰ दकस्नानं॰ श्री रुद्रायनमः शुद्धोदकस्नानंस॰ ॐनमः शंभवायच॰ मूले श्रीमहारुद्रायनमः स्नानंते

४७ आचमनंस॰ प्रमुंचधन्वनस्त्वमुभयो॰ मूले॰ ॥ श्रीमहारुद्रायकौपीनवस्त्रंस॰॥ ॐविज्यंधनुःकपर्दिनो

विशल्यो॰ मूलं॰॥ श्रीमहारुद्रायहैंकावंधनंसम॰॥ ॐयातेहेतिर्मीढुष्ट॰१ परितेधन्वनोहेति॰२ अवत

त्यधनुष्ट्वं॰ २॰॰३ नमस्तआयुधायानातताय॰४ मूले॰ श्रीमहारुद्रायचतुष्कोणे अस्त्रंस॰ अपदे

वंसिंहासनेयंत्रेसंस्थाप्य ॥परशुरामं॥ मानोमहान्तमावाह्यदेवंसिंहासनोपरि॥ ॐ आगच्छभगवान्देव स्थानेचात्रस्थि

ॐमानोमहान्तमुतमानोऽअर्भकं॰१ ॐमानस्तोकेतनये मान॰२ मूले॰ श्री महारुद्राय॰ यंत्रे आवाह रोभव।भावनरुजा

नेस॰१ स्थापये च्छंभवायचा ह्यसंख्याताऽरुचायवा ॐनमः शंभवायचमयोभवा॰ असंख्यातासह समाप्यततायस्त्वंस

स्राणि॰ इतिवा मूले॰ श्रीमहारुद्रास्मिन् यंत्रे स्थापितोभव॥ विस्मुभट्टेनस्वकृतरुद्रविधाने अथपुनः निधोभव ५

आसनादिस्नानांते कार्यमित्युक्तं तद्यथा ॐचतुःस्रक्तिर्नाभिर्ऋतस्यसप्रथाः॰१ मूले॰ श्री

रुद्राय॰ आसनंस॰ ॐमनोजूतिर्जुषता॰ मूले॰ श्रीमहारुद्राय॰ उपवेशनंस॰॥ वन्दामि शृंगेपुर श्वरणं॥

ट्टै३ स्ति९ ४८

नमः श्रुव्याय च हरित्याय च ॰ मूलं ॰ पाद्यं स ॰ नमः शंभवाय च मयोभवाय ॰ ॥ मूलं ॰ अर्घं स म ॰ ॐ त्र्यं
बकं यजामहे ॰ मूलं ॰ अर्घांते आचमनीयं स ॰ मानस्तोके तनये ॰ मूलं ॰ श्रीमहारु ॰ स्नानं ॰ नमः शंभ
वायेति ॰ मूलं ॥ श्रीमहारुद्राय ॰ स्नानांते आचमनं स ॰ ॥ इति विशेषः अन्यैर्नोक्तं नस्माकृतं ॥ ततो दशा
क्षरं मंत्रं न्यसेद्देवस्य मस्तके ॐ नमो भगवते रुद्राय इति देवमस्तके न्यसेत् अथ वस्त्रं ॐ कालाग्निरुद्र
वरद वरदाभयदायक वस्त्रं गृहाण देवेश दिव्यगंधोपपादितं ॐ नमो हिरण्यबाहवे सेनान्ये ॰ मूलं ॰ श्री
महारुद्राय ॰ वस्त्रं समर्प्पयामि श्रीमहारुद्राय नमः वस्त्रांते पुनराचमनं समर्पयामि ॥ अथाभूषणानि ॥
स्वभावसुंदरांगाय नानाशक्त्याश्रयाय ते भूषणानि विचित्राणि कल्पयाम्यमरार्चिता ॐ नमः शंभवाय च
मयोभवाय च ॰ ॥ मूलं ॥ श्रीमहारुद्राय ॰ आभूषणं स ॰ ॐ नमो ह्रस्वेच प्रभ्रसायच ॰ मूलं ॰ श्रीमहारुद्रा
य ॰ उत्तरीयवस्त्रं समर्प्पयामि ॐ यज्ञोपवीतं परमं पवित्रं विधिनिर्मितं नीलकंठोपवीतं मया दत्तं गृहाण ५२
भो ॐ नमः पर्णाय च पर्णसदाय च म न नमः ज्ञक्षु ॰ मूलं ॥ श्रीमहारुद्राय नमः यज्ञोपवीतं स ॰ अथ गंधं क

वा॰ शां॰ कनिष्ठिकांगुष्ठयोगेन गंधमुद्रया गंधं दद्यात् तत्र गंधाष्टकं चंदनागरुकर्पूरतमालजलकुंकुमं कु
शीतकुष्ठसंयुक्तं शैवं गंधाष्टकं विदुः ॥१॥ ओं नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च॰ मूलं श्री
महारुद्राय॰ गंधं स॰ ओं सदाशिव शिवानंद अक्षतान्परमेश्वर गृहाण त्वमुमाकांत दयां कृत्वा नमोपति
५९ ओं अक्षन्नमीमदंत॰ मूलं॰ श्रीमहारुद्राय॰ अक्षतान् स॰ पुष्पाणि च विचित्राणि मालत्यादीनि वै प्रभो
हृद्यानि च सुगंधीनि बिल्वपत्रं गृहाण मे ओं नमः पर्याय चावार्याय च॰ मूलं॰ तर्जन्यंगुष्ठयोगेन पु
ष्पमुद्रया श्रीमहारुद्राय॰ पुष्पाणि पवित्राणि स॰ अथ शक्तिपूजा तदाह परशुरामः ॥ शक्तिं विना
बिल्व शिवो वार्च्यो नार्च्या शक्तिः शिवं विना तयोरेकस्वरूपत्वादर्चनं युगपत्तयोः तस्माच्छिवस्य वामांगे श छि
क्तिर्या सदांबिकेति यदा आवाहनादिपुष्पपूजनांतं शिवपूजनयुक्तं न कृतं चेत्तदात्र पृथक्कार्या॥
अथो यरुद्रस्यांगे एकादशरुद्रानक्षतैः पूजयेत् तद्यथा शिवस्य दक्षपादे अघोराय नमः अघोरं पू
जयामीति सर्वत्र वामपादे पशुपतये नमः दक्षजानौ ओं शर्वाय नमः वामजानौ ओं विरूपाय॰ ४९

दक्षकट्यां ॐविरूपायनमः वामकट्यां ॐत्र्यंबकायनमः दक्षकरे कपर्दिनेनमः वामकरे ॐभैरवाय
नमः आद्येंशे ॐशूलपाणयेनमः द्वितीयेंशे ईशानायनमः मूर्द्धि ॐमहेशायनमः अथैकविंशत्यधिक
दे शताक्षततंडुलैरर्चयेत् ॐवृषभध्वजायनमः१ ॐपशुपतये.२ ॐशिवाय.३ ॐशंकराय.४ ॐभवाय.५ मृडाय.६
ॐमहादेवाय.७ ॐरुद्राय.८ ॐपिनाकिने.९ ॐकपर्दिने.१० ॐत्र्यंबकाय.११ एवंशिवमभ्यर्च्य वामांगेशिवा
याअंगेशक्तिंसमर्चयेत् तद्यथा देवस्यवामभागेगंधादिभिः गौरींध्यात्वा कंचुकीवस्त्रादिकंआभूषणादिचो
पहारंदत्वापूजयेदिति पार्वत्याः दक्षपादे ॐभगवत्यैनमः वामपादे ॐउमादेव्यैनमः दक्षजानौ ॐशंक
रप्रियायैनमः वामजानौ पार्वत्यैनमः दक्षकट्यां ॐगौर्यैनमः वामकट्यां ॐकाल्यैनमः दक्षहस्ते ॐकालिं
द्यैनमः वामहस्ते ॐकोटर्यै॰ दक्षकंध्यांसे॰ ॐविश्वंभर्यै॰ वामांसे॰ ॐह्रांह्रीं गंगायैनमः मूर्द्धि ॐशिवश
क्त्यैनमः एवंपार्वत्याअंगेशक्तीः संपूज्य अथदशाक्षरेणमूलमंत्रेण धूपदीपनैवेद्यानिसमर्पयेत् नमः
शंभवायेतिनैवेद्यांते आचमनं॥ नमःशंभवायचमयोभवायचेतितांबूलदानं अनेनैवदक्षिणा

वा॰शां॰ ॐ तेजोसि शुक्रमस्यमृतमसि॰ इत्याराद्रात्रिकं एषते रुद्रभागः सहस्व॰ इति प्रदक्षिणं नमोस्तु रुद्रेभ्यो
ये दिवि येषामिति मंत्रत्रयं पठित्वा प्रणमेदिति संक्षेपेण त्र्यक्षं देवं संपूज्य सविस्तरेण तु पंचवक्त्रपूजां तथा
५० वरणपूजां तेन वक्ष्यते अथ पंचवक्त्रपूजा हस्ते पुष्पांजलिं गृहीत्वा शिवं प्रार्थयेत् ॐ निर्गुणं कारणाक
योसि निष्कालाद्वैतविग्रह स्वरूपावर्तिपूजार्थमनुज्ञां दीयतां मम इति पुष्पांजलिना देवं संप्रार्थ्य अथ
पूजनं ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः धेनु
वाणमुद्रे प्रदर्श्य। तयोर्लक्षणं। वामस्य मध्यमाग्रं तु तर्जन्यग्रे नियोजयेत्। अनामिकां कनिष्ठां च तस्यांगुष्ठेन पीडयेत्। दक्षि-
णस्कंधे धेनुमुद्रेयमीरिता। तथा दक्षमुष्टिस्थतर्जन्या दीर्घया बाणमुद्रेति।
प्रणमेदनेन मंत्रेण ॐ श्वेतवर्णाय हंसवाहनाय पृथिवीतत्त्वाय सृष्टिरूपालने ब्रह्मणे कृध्यायेदष्टकला
सहिताय सद्योजातसंज्ञाय पश्चिमवक्त्राय नमोऽहं ततोऽक्षतैः कलापूजा ॐ ऋद्ध्यै नमः ॐ सिद्ध्यै नमः ॐ ५०
धृत्यै॰ ॐ लक्ष्म्यै॰ ॐ मेधायै॰

ओं कान्त्यै। ओं स्वधायै। ओं धृत्यै। इत्यष्टौ कलाः कनिष्ठागुह्ययोगेन न्यसेत् तत्र श्वेता स्ताः श्वेतचंदनं श्वे
ता निपुष्पाणि गुग्गुलुधूपः घृतदीपस्तथैव पायसं नैवेद्यं॥ सद्योजातामिति मीजेतिपूजनी॥ ओं सद्योजातो
व्यमिमीतयज्ञम मग्निर्देवानामितिजमदग्निर्ऋषिस्त्रिष्टुप्छंदः सत्यम्वक्त्रं देवता सत्यवक्त्रपूजने विनियोगः ओं स
द्योजातो मिमितातयज्ञम ग्निर्देवानाममवत्पुरोगाः अस्यहोतुः प्रदिशदृतस्यवाचि स्वाहाकृतं हविरदंतु देवाः
ओं पश्चिमवक्त्राय नमः इति पूर्वोक्तं इति गंधादि पूजयेत् ततो पुष्पाण्यादाय पश्चिमवक्त्रं ध्यायेत् ॥ओं प्रालेयाम
लबिंदुकुंदधवलं गोक्षीरफेनप्रभं भस्माभ्यंगमनंगदेहदहनं ज्वालावलीलोचनं ब्रह्मेन्द्रादिमरुद्गणैः स्तुतिपरैरर
भ्यर्चितं योगिभिर्वन्दे हं सकलं कलंकरहितं स्थाणोर्मुखं पश्चिमं इति पुष्पांजलिं दत्वा प्रणमेत् इति पश्चि
मवक्त्रपूजनी अघोतरवक्त्रपूजा ओं वामदेवाय नमः इति वामदेवं संस्थाप्य उत्तरवक्त्रे न्यसेत् ॥ओं वामदेवायेति मं
त्रस्य वामदेवऋषिः त्रिजगतीछंदो विष्णुर्देवता उत्तरवक्त्रपूजने विनियोगः ओं वामदेवाय नमो ज्येष्ठाय न
मः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलाय नमो बलविकरणाय नमो बलप्र
मथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः पद्ममुद्रां प्रदर्श्य तल्पर्शे करौ तु संहृतो कृत्वा संमुखौ तुन

२

तांगुलिः तलांतर्मिलितांगुष्ठौ कुर्यादेषा भ्रूमुद्रिकेति एतल्लक्षणलक्षिताया पद्ममुद्राया नमेदनेन मंत्रेण १
+ ॐ गरुडवाहनाय गोरवर्णाय चक्राप्रवृत्तत्वाया ॥ मनतरूपात्मने हेमवर्णामाप्तरजप्रभृति त्रयोदशकलासहि
तायवामदेवसंज्ञायोत्तरवक्त्राय मनमोहिने इति प्रणम्यापस्तैः कलाः पूजयेत् ॐ रजस्येनमः १ ॐ रक्षा
ॐरसे.२ यैः ०२ ॐ पाल्यायै ४ ॐ कामायै ५ ॐ संजीवन्त्यै ६ ॐ प्रियायै ७ ॐ बुध्यै ८ ॐ क्रियायै ९ धा
51 त्र्यै १० ॐ भ्रामण्यै ११ ॐ मोहिन्यै १२ ॐ ज्वरायै नमः १३ इति त्रयोदशकलाः हरिचंदनैश्चंदनं
तुलसीशतपत्राणि पुष्पाणि सौगंधिको धूपः तत्प्रमाणैः कंकोलकं गकर्पूरजातीफललवंगकैः
सुगंधं पंचकं प्रोक्तं माधवेदप्रकाशके इति पंचसौगंधिको धूपः घृतपक्वं गोधूमान्नं नैवेद्यं अ
थ पूजनी ॐ वामनमद्य सवितुरिति मंत्रस्य भरद्वाज ऋषिः ॥ बृहस्पतिर्वा त्रिष्टुप् छंदः उत्तरवक्त्रं
देवता उत्तरवक्त्रपूजने विनियोगः ॐ वामदेवसंज्ञकाय उत्तरवक्त्राय नमः इति पूर्वोक्त पंचोपचा
रैरभ्यर्च्य पुष्पाण्यादाय उत्तरवक्त्रं ध्यायेत् ॥ गौरं कुंकुमपिंगलं सुतिलकं व्यापांडुगंडस्थलं भ्रूविक्षे
पकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलं स्निग्धं बिंबफलाधरं प्रहसितं लीलालकालंकृतं व ५२

२

त्रिभंवक्त्रे १

दे पूर्णं शशपूर्णं कमंडलुं हरस्योत्तरं इति पुष्पांजलिं दत्वा प्रणमेत् इति उत्तरवक्त्रपूजनं अथ दक्षिणवक्त्र
पूजा ॥ ओं अघोरेभ्योथ घोरेभ्य इति अघोरसंज्ञे दक्षिणवक्त्रे न्यसेत् ॥ ओं अघोर इति मंत्रस्य अघोर ऋषि
रनुष्टुप्छंदो रुद्रो देवता दक्षिणवक्त्रपूजने विनियोगः ओं अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः स
र्वेभ्यः सर्वशर्वेभ्यो नमोस्तु रुद्ररूपेभ्यः दक्षिणायनमः ध्यानमुद्रां प्रदर्श्य ॥ तल्लक्षणं तर्जन्यं
गुष्ठकौ छकावयुतो हृदि विन्यसेत् वामहस्तांबुजं वामजानुमूर्द्ध्नि विन्यसेत् ध्यानमुद्रा भवेदेषा ध्येति
लक्षणलक्षितेति इति ध्यानमुद्रां धृत्वा नमस्कुर्यादनेन मंत्रेण ओं कूर्मवाहनाय नीलवर्णाय तेज
स्तत्वाय विश्वरूपात्मने अघोरसंज्ञात्मने नमः अमत्वष्टकलासहिताय दक्षिणवक्त्राय नमो हुं इति
प्रणम्य ततोक्षतैः कलापूजा ओं तमस्यै नमः १ ओं मोहायै · २ ओं रत्यै · ३ ओं कक्ष्यायै · ४ ओं व्याध्यै
नमः ५ ओं मृत्यै नमः ६ ओं क्षुधायै ७ ओं तृष्णायै ०८ इति संपूज्य कृष्णागरुचंदनं नीलोत्प
लानि करवीराणि च पुष्पा सितागरुधूपः माषान्नं नैवेद्यं एतैः पूजयेत् अथ पूजनं ओं यात्ते रुद्र
ति परमेष्ठि ऋषिः अनुष्टुप्छंदः दक्षिणवक्त्रं देवता दक्षिणवक्त्रपूजने विनियोगः ओं यात्ते

२

हृद्रश्मि नातन्द्र घोरा॰ इतिमंत्रेण पंचोपचारैरभ्यर्च्य पुष्पाणि दायध्यायेत् ॐ कालाभ्रभ्रमरांजनाचलनि
52 भं भास्वत्पिंगेक्षणं खड्गं दुद्धमभिप्रितां स्वदशानमोऽस्तिन्न दंष्ट्रांकुरं सर्वप्रोतकपालशक्तिमुसलभव्याकीर्णसव्येतर
स्वरं वंदे दक्षिणमीश्वरस्य जटिलं भीमं गरौद्रं मुखं पुष्पांजलिं दत्वा प्रणमेत् इति दक्षिणवक्त्रपूजा अथ
पूर्ववक्त्रपूजनं ॥ अथ तत्पुरुषायेति तत्पुरुषसंज्ञे पूर्ववक्त्रे न्यसेत् ॥ ॐ तत्पुरुषायेति मंत्रस्य तत्पुरुषऋ
षिः सूर्यो देवता गायत्री छंदः पूर्ववक्त्रपूजने विनियोगः ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः
प्रचोदयात् कवचमुद्रां प्रदर्श्य तल्लक्षणं करद्वयांगुलयोर्वमेलिस्थः प्रणमेदनेन मंत्रेण ॐ अम्बवाहना
यरक्तवर्णाय वायुतत्वात्मने निवृत्त्यादिकला सहिताय तत्पुरुषसंज्ञाय पूर्ववक्त्राय नमो
हैं इति नत्वा ततोऽस्य ते: कलापूजां ॐ निवृत्त्यै नमः १ ॐ प्रतिष्ठायै २ ॐ विद्यायै ३ ॐ शान्त्यै ४ इति कलां:
संपूज्य रक्तचंदनं चंदनं दूर्वांकुराणर्कपुष्पाणि कृष्णागरुधूपं घृतदीपं मोदकाः नैवेद्यं अथ पू
जनं ॐ तत्पुरुषमिति नारायण पुरुषऋषिः ~~अनुष्टुप छंदः~~ अनुष्टुप् छंदः पूर्ववक्त्र देवता पूर्वव १२
क्त्रपूजने विनियोगः ॐ तत्पुरुषाय विद्महे॰ तत्पुरुषसंज्ञकाय पूर्ववक्त्राय नम इति पूर्वोक्त ५२
धा

पंचोपचारैरभ्यर्च्य पुष्पाण्यादाय पूर्ववक्त्रं ध्यायेत् ॥ संवर्त्ताग्नितडित्प्रतप्तकनकप्रस्पर्द्धितेजोरुणं
गंभीरस्मितनिःसृतोग्रदशनं दंशनप्रोद्भासिताम्राधरं बालेंदुद्युतिलोलपिंगलजटाभारप्रबद्धोद
रं वंदे सिद्धसुरासुरेंद्रनमितं पूर्वमुखं शूलिनः ॥ पुष्पांजलिं दत्वा नमस्कुर्यात् ॥ इति पूर्ववक्त्रपूजनं
अथोर्ध्ववक्त्रपूजा ततः ईशान इति इति ईशानसंज्ञऊर्ध्ववक्त्रे न्यसेत् ओं ईशान इति मंत्रस्य ई
शान ऋषिः त्रिष्टुप् छंदः श्रीसदाशिवो देवता ऊर्ध्ववक्त्रपूजने विनियोगः ओं ईशानः सर्ववि
द्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् व्यापकांज
लिकं नाममुद्रां प्रदर्शयेत् तल्लक्षणं उत्तानौ तादृशावेव व्यापकांजलिके करौ आस्यायमर्थः ॥ ता
दृशौ संसक्तावेवोत्तानौ करौ व्यापकांजलिकं नाममुद्रा तां प्रदर्श्य पूर्णमेदनेन मंत्रेण ओं वृषभवा
हनाय पीतवर्णाय आकाशतत्वाय सर्वव्यापकात्मने अलक्ष्याय शशिन्यादिपंचकलोपेताय ई
शानसंज्ञकाय ऊर्ध्ववक्त्राय नमोहं इति नत्वा तत्पूजेत् कलापूजा ओं शशिन्यै, १ ओं अं
गदायै २ ओं इष्टायै ३ ओं मरीच्यै ४ ओं ज्वालिन्यै ५ इति कलाः पंचलिंगमुद्रया संपूज्य भस्मचं

चंदनं।

53 दनं बिल्वपत्रकनकपुष्पमत्रदत्वा न्यान्यपि पुष्पाणि हरिचंदनं सोगंधिको धूपः शर्करादध्योदनं नैवेद्यं अथ पूजनी ॐ नमीशानमिति मंत्रस्य गोतम ऋषिर्जगती छंदः ॐ ध्वजवक्त्रो देवो अस्य पूजने विनियोगः ॐ नमीशानं जगतस्तस्थुषस्पतिं० ईशानसंज्ञकायो ध्वजवक्त्राय नमः इति पूर्वोक्त पंचोपचारेरभ्यर्च्य हस्ते पुष्पाण्यादायो ध्वजवक्त्रं ध्यायेत ॥ व्यक्ताव्यक्तगुणोत्तरं सुवदनं षट्त्रिंशतत्वाधिकं तस्मादुत्तमतत्वमक्षरमिति ध्येयं सदा योगिभिः वंदे तामसवर्जितं नमनसा हंस्माच्चसत्त्वं परं शांतं पंचममीश्वरं वदनं खंव्यापितेजोमयं इति पुष्पांजलिं दत्वा नमस्कुर्यात इति पंचवक्त्रपूजा अथ पश्चिम समीपे यंत्र मध्ये अघोराद्येकादश मूर्तीनां अत्र स्तनो पूजनं ॐ अघोराय नमः १ ॐ पशुपतये २ ॐ शर्वाय नमः ॐ विरूपाय नमः ४ ॐ विश्वरूपिणे ५ ॐ त्र्यंबकाय ६ ॐ कपर्दिने ७ ॐ भैरवाय ८ ॐ शूलपाणये ९ ॐ ईशानाय १० ॐ महेशाय ११ इति संपूज्य अष्टशक्ति पूजनं यंत्रे अष्टदले प्रागादि दिक्षु यथा ॐ उमायै नमः प्राक् १ ॐ शंकरप्रियायै नमः आग्नेय्यां २ ॐ गौर्यै दक्षिणे ३ ॐ पार्वत्यै नैर्ऋते ४ ॐ कालिं

ता फ़िवर

५२

ये: पश्चिमे ५ ॐ कोटर्यै, वायो ६ ॐ विश्वधारिण्यै उत्तरे ७ ॐ गंगायै नमः ईशान्यां ८ इति श
क्तिपूजनं तद्वद्देवगणपत्यादयोष्टदिक्षु पूज्याः ॐ गणपतये पू० १ ॐ स्वामिकुमाराय आ
ग्नेये २ ॐ पुष्पदंताय द० ३ ॐ कपर्दिने नैर्ऋते ४ ॐ नंदिने नमः पश्चिमे ५ ॐ महाकालाय
वायो ६ ॐ भृंगिरिटये उत्तरे ७ ॐ स्कंदाय ईशाने ८ ईशानीप्रागंतराले ॐ चंडाय नमः ९ अ
थ न्यासवत् पूर्वे इंद्राय १ आ० अग्नये २ द० यमाय नमः ३ नै० निर्ऋतये ४ प० वरुणाय ५ वा
यो वायवे ६ उत्तरे सोमाय नमः ७ ईशाने ईशानाय ८ पूर्वैशानयोर्मध्ये ॐ ब्रह्मणे नमः प
श्चिमनिर्ऋतिमध्ये ॐ अनंताय १० पूर्वादि सूर्याय १ चंद्रमसे २ भौमाय ३ बुधाय ४ गु
रवे ५ भार्गवे ६ शनैश्चराय ७ राहवे ८ पूर्वैशानयोर्मध्ये ॐ केतुभ्यो ९ इत्यक्षतैः संपू
ज्य ॥ ॥ ततो देव्याय लिंगमुद्रां योनिमुद्रां कालिकामुद्रां त्रिशूलमुद्रां पद्ममुद्रां धेनुमुद्रां च प्रद
र्शयेत् ॥ ॥ तेषां लक्षणपूर्वकं प्रदर्शनं यथा ॥ उच्छ्रितं दक्षिणांगुष्ठं वामांगुष्ठेन बाधयेत् वा
मांगुलिदक्षिणाभिरंगुलीभिश्च वेष्टयेत् लिंगमुद्रेयमाख्याता शिवसान्निध्यकारिणी इति लिं
ता १

५

गमुद्रा मिथः कनिष्ठिके कृत्वा तर्जनीभ्यामनामिके अनामिकोर्ध्वसंश्लिष्ट दीर्घमध्यमयोरधः अं-
54 गुष्ठाग्रद्वयंन्यासो योनिमुद्रेयमीरिता इति योनिमुद्रा अंगुष्ठाभ्यन्तरे कृत्वा मुष्ट्योः संलग्नयोर्द्वि-
योः तावेवाभिमुखौ कुर्यान्मुद्रैषा कालकर्णिका इति कालकर्णिकामुद्रा अंगुष्ठेन कनिष्ठां तु ब-
द्ध्वा शिष्टांगुलित्रयं प्रसारयेत्त्रिशूलस्य मुद्रेयं परिकीर्तिता इति त्रिशूलमुद्रा करौ तु संहतौ कृत्वा
सम्मुखौ व्युन्नतांगुलिः तलौ तु मिलितांगुष्ठौ कुर्यादेषाब्जमुद्रिका इति पद्ममुद्रा अन्योन्याभिमुखे
श्लिष्टकनिष्ठानामिके पुनः तथा तु तर्जनीमध्ये धेनुमुद्रा समीरिता इति धेनुमुद्रा इति देव्या यमुद्रां
प्रदर्श्य आवरणपूजां कुर्यात् ॥ अथावरणपूजा ॥ ॥ तत्र विधिः मध्ये दशाक्षरं पठित्वा ॐ
श्रीमहारुद्राय पार्वतीसहिताय नमः इति प्रणवादिनमोन्तैः सर्वत्राक्षरैः पूजा कार्या ॥ ततः पश्चि-
मोत्तरदक्षिणपूर्वमध्यानुक्रमेण ॐ सद्योजाताय नमः इति मध्ये पश्चिमे १ ~~ॐ वामदेवाय नमः इ-~~
~~ति मध्ये पश्चिमे १~~ ॐ वामदेवाय नमः इत्युत्तरे २ ॐ अघोराय नमः इति दक्षिणे ३ ॐ तत्पुरुषा-
य नमः पूर्वे ४ ई ॐ ईशानाय नमः इति मध्ये ५ इति मध्ये संपूज्य दलेष्वष्टसु नंदादि पूकी ५८

पुनर्जलधारयासंस्नाप्य कल्पलतायां विशेषः आमंद्रैरिंद्र हरिभिर्याहि मयूररोमभिः॥ स्नात्वा केचिन्नियमा
च्छिन्नपाणिनोतिधन्वेव तां रँ इहि॥ इतिच पूर्वोक्तमंत्रैस्तैलेनसंस्नाप्य पश्चात् घृतं मिमिक्षेइतिघृतेन॥
दिवि विष्णुर्व्यक्रंस्तजागतेन छंदसा इति पीठिकोद्वर्त्तनं॥ ओं याः ओषधीरितिमंत्रेण धात्रीकल्केन स्नप
नं ओं यद्रूवध्यमुदरस्येतिमंत्रेण गंधोदकस्नानं ततः पंचगव्यस्नानं गायत्र्यागोमूत्रं गंधद्वारेतिगोमयं॥
आप्यायस्वेतिक्षीरं दधिक्राव्णो इतिदधि तेजोसीत्याज्यं देवस्यत्वेतिकुशोदकं इत्यनुक्रमेण कृत्वा शुद्धज
लेन संस्नाप्य ततः मूर्त्तयः जलान्निष्काश्य वस्त्रेण प्रोंछयित्वा पात्रोत्तरे निधाय पूजयेत् अथपरशुरामोक्त
पूजनप्रकारः तत्रप्रथ अथावाहनं स्वहस्ताभ्यां पुष्पाणि गृहीत्वा आवाहनमुद्रया हृदिस्थं ज्योतिर्मयं सपरि
अथावाहनं वारं ध्यात्वा तवेयं महिमा मूर्त्तिस्तस्यां त्वा सर्वगं शिवं भक्तिस्नेहसमाकृष्टदीपवत्स्थापयाम्यहं देवेशमुक्तिमु
लभ सर्वावरणसंयुत यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरो भव॥ ओं आत्वा वहंतु हरय सचेतसः श्वेतैरश्वैः सह
केतुमद्भिर्वीतारजैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वौं हूयं नाम क्षीणां देवानां च मनुष्याणां च सर्व
अंबे

वा॰शां ~~सर्वेभ्यो भगवेभ्यः~~ ध्या: सहस्राक्षं विरूपाक्षं महादेवं शिवं आवाहयामि ॐ नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे
अथो ये अस्य सत्वानोहं तेभ्योकरन्नमः इति मंत्रं पठित्वा दक्षिणनासापुटेण पुष्पांजलावानीय मूलेन च जगद्गु
54 रुं अनंतशक्तियुक्तं उमारमणं नित्यचित्स्वभावमधिगतकलुषप्रपंचं पंचगुणगणं सर्वज्ञं सदाशिवं श्रीमहारुद्रं
आवाहयामि शिवाय नमः आवाहनं समर्पयामि अथ शिवोत्संगे पार्वतीमावाह्य ॐ या ते रुद्र शिवा तनूः इति मं
त्रेण वा एष ते रुद्र भागः इत्यनेन मूलं पठित्वा शिवायै नमः शिवां आ॰ मि एवं सर्वत्र आवाहनमुद्रयावाहयेत् त
ल्लक्षणं सम्यक्संपूजितैः पुष्पैः कराभ्यां रचितांजलिः आवाहने समाख्याता मुद्रा देशिकसत्तमैः ॐ आवाहि
तो भवः ततः स्थापनमुद्रास्थापयेत् अधोमुखीकृता सैव प्रोक्ता स्थापनकर्मणि॥ संस्थापितो भव॥ ततः सन्निधा
धानमुद्रया सन्निधानं कुर्यात् ॐ सन्निधीकरोमि॥ सन्निहितो भव॥ ततः सन्निरोधनमुद्रया संनिरोधं कुर्यात्॥
अंगुष्ठगर्भिणी सैव सन्निरोधे समीरिता सन्निरोधयामि सन्निरुद्धो भव॥ ततः सकलीकरणमुद्रया सकलीकर
णं कुर्यात् देवतांगे षडंगन्यासः स्यात्सकलीकृतिः॥ यथा॥ दर्भांकुरेण देवं स्पृशेत् षडंगानि न्यसेत् ॐ हृदया
२ नो य॰ नमः शिरसे स्वाहा भगं शिखायै वषट् वं कवचाय हुं रुद्रं नेत्रत्रयाय वौषट् पं अस्त्राय फट् इति षडंगः ४५

आह्लिष्टमुष्टियुगलान्नगांगुष्ठमुद्रिका॥ सन्निधाने समुद्दिष्टा मुद्रेयं तत्त्ववेदिभिः ४

दिक्क्रमयोगतः ॐ नंदिने नमः १ ॐ महाकालाय. २ ॐ गणेश्वराय. ३ ॐ वृषभाय. ४ ॐ भृंगिरि
टये. ५ ॐ स्कंदाय. ६ ॐ उमायै. ७ ॐ चंडेशाय नमः ८ पुष्पांजलिं गृहीत्वा ॐ अभीष्टसिद्धिं मे देहि शर
णागतवत्सल भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं इति संप्रार्थ्य पुष्पांजलिं दत्वा प्रणमेत् इति प्रथमा
वरणं १ षोडशभिरिततः पश्चाद्द्वितीयावरणे यजेत् ॐ अनंताय. १ ॐ सूक्ष्माय. २ ॐ शिवाय. ३ ॐ
मेकपादाय. ४ ॐ एकरुद्राय. ५ ॐ त्रिमूर्तये. ६ ॐ श्रीकंठाय. ७ ॐ वामदेवाय. ८ ॐ ज्येष्ठाय. ९
९ ॐ श्रेष्ठाय. १० ॐ रुद्राय. ११ ॐ कालाय. १२ ॐ कलविकरणाय. १३ ॐ बलाय. १४ ॐ बल
विकरणाय. १५ ॐ बलप्रमथनाय. १६ पुष्पांजलिं गृहीत्वा प्रार्थयेत् ॐ अभीष्टसिद्धिं. द्वितीयाव
रणार्चनं इति पुष्पांजलिं दत्वा प्रणमेत् इति द्वितीयावरणं ॥२॥ तृतीयावरणे पत्रेषु चतुर्विं
शद्दले यजेत् यथा ॥ ॐ अणिमायै. १ ॐ महिमायै. २ ॐ लघिमायै. ३ ॐ गरिमायै. ४ ॐ प्राप्त्यै.
५ ॐ प्राकाम्यै. ६ ॐ ईशितायै. ७ ॐ ब्राह्म्यै. ९ ॐ माहेश्वर्यै. १० ॐ कौमार्यै. ११ ॐ वैष्णव्यै.
१२ ॐ वाराह्यै. १३ ॐ इंद्राण्यै. १४ ॐ चामुंडायै. १५ ॐ चंडिकायै. १६ ॐ असितांगभैर

वशितायै ८

55 वाय. १८ ओं रुरुभैरवाय. १९ ओं चंडभैरवाय. २० ओं क्रोधभैरवाय. २१ ओं उन्मत्तभैरवाय. २२,
ओं कपालभैरवाय. २३ ओं भीषणभैरवायनमः २४ ओं संहारभैरवायनमः २५ पुष्पांजलिम
हीत्वा शिवं प्रार्थयेत् ओं अभीष्टसिद्धिं मे देव १ तृतीयावरणार्चनं १ इति प्रार्थयित्वा पुष्पांजलिं
दत्वा प्रणमेत् इति तृतीयावरणी ॥३॥ द्वात्रिंशत्पत्रके पूर्वे भवाष्टकमुदाहृतं चतुर्थावरणान्ये
व पंचमावरणांततः ओं भवायनमः १ ओं शिवाय. २ ओं रुद्राय. ३ ओं मीशानाय. ४ ओं पशुपतये.
५ ओं भीमाय. ६ ओं उग्राय. ७ ओं महादेवाय. ८ ओं मनंताय. ९ ओं शुकाय. १० ओं जाह्नकाय.
११ ओं कुलीरकाय. १२ ओं कर्कोटकाय. १३ ओं शंखपालाय. १४ ओं कंबलाय. १५ ओं मश्वतर्का
य. १६ ओं वैदेन्याय. १७ ओं एषुके. १८ ओं हेहया. २० ओं शाकुंतलाय. २१ ओं भरताय. २२ ओं न
लाय. २३ ओं रामाय. २४ ओं हिमवते. २५ ओं निषधाय. २६ ओं विंध्याय. २७ ओं मलयाय. २८
ओं पारिजाताय. २९ ओं मलयाचलाय. ३० ओं मत्स्याहेमकूटाय. ३१ ओं गंधमादनायनमः पु
ष्पांजलिमादाय देवं प्रार्थयेत् ओं अभीष्टसिद्धिं मे देव. चतुर्थावरणार्चनं इति संप्रार्थ्य पुष्पांज ५५

१९ ओं मर्कुटाय ४

लिं निवेद्य प्रणमेत् ॥ इति चतुर्थावरणं ॥ चत्वारिंशद्दलं पद्मं पंचमावरणे लिखेत् ॥ ओं इंद्राय. १
१ ओं अग्नये २ ओं यमाय. ३ ओं निर्ऋतये. ४ ओं वरुणाय. ५ ओं वायवे. ६ ओं कुबेराय ७.
ईशानाय. ८ ओं पृथ्व्यै ९ ओं स्वाहायै. १० ओं वाराह्यै. ११ ओं नड्डिन्यै. १२ ओं वारुण्यै. १३ ओं मृगा
रूढायै. १४ ओं कौबेर्यै. १५ ओं मालिन्यै. १६ ओं वज्राय. १७ ओं शक्तये. १८ ओं दंडाय. १९ ओं खड्
गाय. २० ओं पाशाय. २१ ओं ध्वजायै. २२ ओं गदायै. २३ ओं त्रिशूलाय. २४ ओं गजाय. २५
ओं मेषाय. २६ ओं महिषाय. २७ ओं प्रेताय. २८ ओं मकराय. २९ ओं मृगाय. ३० ओं नराय.
३१ ~~ओं ऐरावताय ३२~~ ओं वृषभाय. ३२ ओं ऐरावताय. ३३ ओं पुंडरीकाय. ३४ ओं वामना
य. ३५ ओं कुमुदाय. ३६ ओं अंजनाय. ३७ ओं पुष्पदंताय. ३८ ओं सार्वभौमाय. ३९ ओं सुप्र
तीकाय. ४० मृगहान्तः पुनर्लेख्याः ओं इंद्राय नमः पूर्वे १ ओं अग्नये नमः आग्नेय्यां २ ओं य
माय नमः दक्षिणे ३ निर्ऋतये नमः नैर्ऋत्यां ४ ओं वरुणाय नमः वायो ६ ओं कुबेराय न
मः उत्तरे ७ ओं ईशानाय नमः ईशान्यां ८ ओं विरूपाय नमः इत्याग्नेय्यां १ ओं विश्वरूपा

56 यनमः नैरृत्यां २ ॐ पशुपतये नमः वायव्यां ३ ॐ ऊर्ध्वलिंगाय नमः ईशान्यां ४ प्रागादिक्रम
तो लेख्याः शेषाद्याष्टनागाः । ६ हिः ॐ शेषाय श्वेतरूपाय विप्रवर्णाय सहस्रफणाय नमः इ
ति पूर्वे । ॐ तक्षकाय नीलरूपाय वैश्यवर्णाय पंचशतफणाय नमः इत्याग्नेय्यां २ ॐ मनंता
य कुंकुमारुणरूपाय विप्रवर्णाय सहस्रफणाय नमः इति दक्षिणे ३ ॐ वासुकये श्वेतरूपाय
क्षत्रियवर्णाय सप्तशतफणाय नमः इति नैरृत्यां ४ ॐ शंखपालाय पीतरूपाय क्षत्रि
यवर्णाय सप्तसतफणाय नमः इति वारुण्यां ५ ॐ महापद्माय नीलरूपाय वैश्यवर्णाय पं
चशतफणाय नमः इति वायव्यां ६ ॐ कंबलाय कृष्णरूपाय शूद्रवर्णाय त्रिंशत्फणाय नमः
इति कौबेर्यां ७ ॐ कर्कोटकाय श्वेतरूपाय शूद्रवर्णाय त्रिंशत्फणाय नमः इतीशान्यां पु
ष्पांजलिमादाय संप्रार्थ्य ॐ अभीष्टसिद्धिं मे देव शरणागतवत्सल भक्त्या समर्पये तुभ्यं पं
चमावरणार्चनं इति प्रार्थ्य पुष्पांजलिं दत्वा प्रणमेत् ॥ रुद्रपीठमिदं सर्वं रुद्राकल्पेषु विश्रुतं
शंभुनाख्यं यमाख्यातं भक्तानुग्रहकारणात् ॥ इत्यावरणपूजा अथाष्टोत्तरशतनामपूजां ५६

मन्त्रैकं नामभिः कुसुमाक्षतैः पूजयेत् विस्तरभयान्नामानि नात्र लिखितानि ॥ अथ धूपं ॐ महा
देव महाधीश जगदीश निरंजन धूपं गृहाण देवेश साज्यं गुग्गुलकल्पितं ॐ वनस्पतिरसो धू
पो० २ ॐ नमः कपर्दिने च व्युप्तकेशाय० सांगाय सपरिवाराय सायुधाय पार्वतीशक्तिसहिता
य श्री महारुद्राय नमः धूपं समर्पयामि तर्जन्यंगुष्ठयोगेन धूपमुद्रया धूपं दद्यात् ॥ ॐ हिर
स्नानाय ण्यबाहो सेनान्य ईशान्य तेजसो दीपं गृहाण कर्पूरिककल्पितात्यक्तिवर्तिकं १ ॐ आज्यं त्रिवर्ति सं
युक्तं० ॐ नमः आशवे चाजिराय च नमः श्री० मूलं मध्यमांगुष्ठयोगेन दीपमुद्रा सांगाय०
श्री महारुद्राय० दीपं स० ॥ ॐ अन्नानामपि सर्वेषां पत्ये दीनार्तिनाशकृत् षड्रसैश्च समायुक्तं
गृहाणान्नं निवेदितं अन्नं चतुर्विधं० ॐ नमो बभ्लुशाय व्याधिने अन्नानां पतये नमः० मूलं गायत्री
मंत्रेण संप्रोक्ष्य धेनुमुद्रया अमृतीकृत्य ॐ सांगाय० श्री महारुद्राय० नैवेद्यं समर्पयामि ॥ ॐ
अमृतोपस्तरणमसि प्राणाय स्वाहेत्यादि पठित्वा ॥ ॐ नमस्ते देवदेवेश सर्वतृप्तिकरं वरं अ
न्नादि निवेदितं शुद्धं भक्त्या स्वयं सुशीतलं परमानंदसंपूर्णं गृहाण जलमुत्तमं मूलं सांगाय०

७

57 ~~श्रीमहारुद्राय॰~~ श्रीमहारुद्राय॰ मध्येपानीयं स॰ ॥ अत्रान्तरे षडंगरुद्राध्यायं पठित्वा अन्यैः स्तोत्रपा
गद्यैः शिवं स्तुत्वा यथाशक्ति मूलं जपित्वा आपोशानं दद्यात् ॥ ओं उत्तरापोशनीकर्तुं तोयमुद्धृतमुज्ज्व
लं मयानिवेदितं भक्त्या गृहाण परमेश्वर मूलं ओं अमृतापिधानमसि स्वाहा सांगाय॰ श्रीमहारुद्राय॰
उत्तरापोशनं समर्पयामि ॥ ॥ अथ चंडपूजा तदाह परशुरामः रुद्रनैवेद्यमध्यस्थं नीत्वान्नं रुद्र
कोणतः दद्याच्चंडविभागं तं चंडाय प्रीयतामिति ततः पीठदेशान्यां भूमौ गोमयादिना मंडलं कृत्वा तत्र
चंडमेकवक्त्रं चतुर्मुखं चतुर्भुजं स्थूलटंकाक्षसूत्रकमंडलुधरं जटिनं ध्यात्वा नैवेद्यशतांशं तोयप्लु
तं मंडले क्षिपेत् तत्रमंत्रः ओं चंडेश्वराय निर्माल्यबलिं समर्पयामि नमः ॥ हस्तं प्रक्षाल्य इति चंडबलिः
ओं मत्रिनातापितं वारि कलशेनोद्धृतं मया करप्रक्षालनं कर्तुं गृहाण करुणानिधे मूलं सांगाय॰ श्री
महारुद्राय॰ करप्रक्षालनं समर्पयामि ॥ ओं मलयाचलसंभूतं कर्पूरेण समन्वितं करोद्वर्तनकं चा
रु गृहाण त्रिपुरान्तक मूलं सांगाय॰ श्रीमहारुद्राय॰ करोद्वर्तनार्थे चंदनं स॰ मि ॥ ओं शाश्वती श्री
मयानंदमदनान्तक धूर्जटे गृहाण पूगतांबूलदलं चूर्णसखादिरं ॥ पूगीफलं महद्दिव्यं नागवल्ली

उ

तांबूलं

दलैर्युतं एलाकर्पूरसंयुक्तं प्रतिगृह्यतां ॐ नमः पर्ण्याय च पर्णशदाय च० मूलं सांगाय० श्रीमहारुद्रा
य० मुखवासार्थे पूगीफलतांबूलं स०॥॥ तांबूलं मुखवासावितिकौसुमेन तल्लक्षणं हेमाद्रौ रत्न
कोशे ॥ महापिप्पलपत्राणि क्रमुकस्य फलानि च मुक्ताचूर्णेन संयुक्तं तांबूलमिति संज्ञितं ॥ ॥
श्वेतपत्रं सचूर्णं च क्रमुकस्य फलानि च नालिकेरफलोपेतं मातुलिंगसंयुतं एलाकर्पूरकंको
लैर्मुखवासं प्रचक्षते एतेषामप्यलाभे तु तद्द्रव्यं स्मरेद्बुध इति ॥ ॥ ॐ राजाधिराज देवेश
निराकार निरास्पद फलं गृहाण देवेश नालिकेरादिकं शुचिः इदं फलं मया देवस्थापि० ॐ
नमो रुद्राय तवसे कपर्दिने० मूलं सांगाय० श्रीमहारुद्राय० नालिकेरादिकं ऋतूद्भवानि नाना
विधानि फलानि समर्पयामि ॥ ॐ हिरण्यगर्भगर्भस्थं हेमबीजं वि० ॥ ॐ नमः शंभवाय च मयो
भवाय च० मूलं सांगाय० श्रीमहारुद्राय नमः सुवर्णदक्षिणां समर्पयामि ॥ ॐ समस्तचक्रचक्रे
शपरिवारगणावृत आरार्तिकमिदं देव गृहाण परमेश्वर ॐ चंद्रादित्यौ च धरणी वि० ॐ
तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि मूलं ॐ सांगा

यसप० श्रीमहारुद्राय० नीराजनं समर्पयामि अत्र नीराजने विशेषो हेमाद्रौ ॐ चंद्रादित्यौ च धरणी वि
द्युदग्निस्तथैव च त्वमेव सर्वज्योतींष्य आर्तिक्यं प्रतिगृह्यतां शालिपिष्टोद्भवैः शुद्धैर्घृतदीपैः समु
ज्वलैः ततो नीराजनं दीपैः शाङ्गिं शान्मातु कारयेत् इति॥ अथ चामरार्पणं॥ ॐ जाह्नवीयमुनारं गंसा
शंकुंदालिसन्निभं चामरं गृह्यतां देव स्वर्णदंडसमन्वितं॥ ॐ नमः शंभवाय च म० ले॥ ~~ॐ नमः शंभ~~
सांगाय० श्रीमहारुद्राय० चामरं समर्प्पयामि॥ अथ व्यजनं॥ ॐ मुक्ताजालविचित्रांगं मंदवायुस
माकुलं मायूरैर्निर्मितं देव व्यजनं प्रतिगृह्यतां ॐ नमः शंभवाय च म० ले सांगाय० श्रीमहारुद्राय०
व्यजनं समर्प्पयामि अथ दर्पणं साविरु किरणस्पर्द्धि स्फुरत्किरणमंडलं दर्पणं मणिसंयुक्तं गृहा
ण त्रिपुरांतक ॐ नमः शंभवाय च म० लं सांगाय० श्रीमहारुद्राय० दर्पणं समर्पयामि॥ अन्यच्छत्र
पादुकावपानहनादि सर्वं नमः शंभवायेति मंत्रेणाग्रे समर्प्पयेत्॥ अथ पुष्पांजलिः॥ ॐ हर विश्वा
खिलाधार निराधार निराश्रय पुष्पांजलिमिमां शंभो गृहाण वरदायक ॐ नमस्तक्षभ्यो रथ
कारेभ्यश्च वो नमः कुलालेभ्यः०॥ ॐ यज्ञेन यज्ञ० ॐ राजाधिराजाय० म० ले ॐ सांगाय० श्रीमहारुद्रा

यनमः मंत्रपुष्पांजलिं समर्पयामि अथनृत्यवाद्यगीतसमर्पणं ॐ नृत्तायस्तंगीतायशैलूखं० मूलं सां
गाय० श्रीमहारुद्रायनमः नृत्यगीतवाद्यानि समर्पयामि ॥ अथप्रदक्षिणा ॥ ॐ एषमेरुद्र्भागः सह स्वस्रं
विकया० यानिकानिचपापानि० मूलं सांगाय० श्रीमहारुद्राय० प्रदक्षिणां० स० मि ॥ अथ प्रणामः ॐ मृ
डानीनाथमेसर्वानपराधाननेकधा क्षमस्वाभिप्रणामैतेकरोम्यष्टांगसंभवं ॐ नमोस्तुरुद्रेभ्योयेदिवि
येषामितिमंत्रत्रयं पठित्वा मूलं सांगाय० श्रीमहारुद्राय० नमस्कारान्समर्पयामि अथपुष्पाक्षतहस्तः
शिवंप्रार्थयेत् ॥ ॐ जयदेवजगन्नाथजयशंकरशाश्वत जयसर्वसुराध्यक्षजयसर्वसुरार्चित १ जयसर्वगुणा
तीतजयसर्ववरप्रद जयनित्यनिराधारजयविश्वंभराव्यय २ जयविश्वैकवंद्येशजयनागेंद्रभूषण जयगौरी
पतेशंभोजयचंद्रार्द्धशेखर ३ जयकोट्यर्कसंकाशजयानंतगुणालय जयनाथकृपासिंधोजयभक्तार्त्तिभं
जन ४ जयदुस्तारसंसारसागरोत्तारणप्रभो प्रसीदमेमहादेवसंसारार्त्तस्यखिद्यतः सर्वपापक्षयंकृत्वा
रक्षमांपरमेश्वर ५ सांगायश्रीमहारुद्रायप्रार्थनां स० अथस्तुतिः ॥ ॐ नमः शिवायशुद्धायसर्वगायामता
त्मने कपर्दिनेनमस्तुभ्यंनमस्तुभ्यंत्रिमूर्त्तये १ नमः स्थूलायसूक्ष्मायव्यापकायमहात्मने निर्गुणाय २

नमस्तुभ्यं त्रिनेत्राय नमोस्तुते २ नमश्चंद्रकलाधार नमो दिग्वसनाय च पिनाकपाणये तुभ्यं नमः ष्टमूर्त्तेन -
59 मो नमः ३ नमस्ते कामरूपाय सर्वज्ञानमयाय च कामारये नमस्तुभ्यं गिरीशाय नमोस्तुते ४ जगद्रक्षांत
सर्वाणां कारणाय नमो नमः गौरीकांत नमस्तुभ्यं नमस्तुभ्यं सुधात्मने ५ विश्वरूपाय सौम्याय [illegible] नम
स्तुभ्यं सुखात्मने अनविद्युस्वरूपाय नमस्ते स्तु जगत्पते ६ सूर्यचंद्रस्वरूपाय सर्वदेवमयाय च एतस्मिन्ने
व काले तु वाग्वाचा॥ शरीरिणी ७ यदि तुष्टोस्मि भद्रं ते वरं वरय सुव्रत श्रीमहारुद्राय॰ स्तुति पा ठंस॰ मि॥ ८
ति स्कांदे वसिष्ठकृता शिवस्तुतिः॥ ॥ अथ देवस्य मूर्द्धि दशाक्षरेण मूलमंत्रेण पुष्पांजलित्रयं दद्या
त् ततो देवं ध्यायेत् १ त्रिलोचनं चतुर्बाहुं सर्वाभरणभूषितं नागयज्ञोपवीतं च व्याघ्रचर्मोत्तरीयकं वृष
स्कंधसमारूढमुमादेहार्द्धधारिणं अम्लतेनाप्लुतं शांतं चंद्रार्द्धकृतशेखरं शुद्धस्फटिकसंकाशं नयामु
कुटमंडितं वराभयहस्तं च सर्वकामफलप्रदं एवं ध्यायेद्द्विजः सम्यगनंगांगहरं हरं एवं ध्यात्वा प्रार्थ
येत्॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर यत्पूजितो मया देव परिपूर्णं तदस्तु मे आवाहनं न जानामि
न जानामि विसर्जनं पूजनं च न जानामि क्षमस्व परमेश्वर इति नमस्कृत्य हस्तेन लिंगं हीत्वा गौं अ ५९

नया॰ यथाशक्ति कृतया पूजया भगवान् सपरिवारः श्रीमहारुद्रः प्रीयतामिति पूजां समर्पयेत् अथ पूर्ण॰
त्तियोसंग्रहमः हारुद्रजपपुरश्चरणशाहवनकर्मणि यथामिलितोपचारैर्यथामत्या यथाज्ञानेन श्रीमहा
रुद्रपूजनेन कृतस्य कर्मणो विधेर्यन्न्यूनं॰ ब्राह्मणानां श्रीमहारुद्रस्य च प्रसादात्सर्वं विधेः परिपू
र्णमस्तु ॥ विशेषार्घदानस्तुतिविशेषो होमान्ते विसर्जनावसरे वक्ष्यते ॥ ॥ इति होमांगशिवपूजा
यागविधिः समाप्तः ॥

60

अथसाचार्यो यजमानः अग्नेः पश्चादुपविश्य ओंनायकाजयपरं पाठकाः पठंत्विति वदेत् तत्रपारा
यणपाठकाः सूक्तपाठकाः शांतिपाठकाः स्वस्वमासादिकं कृत्वा स्वस्वपाठान् पठेयुः अथद्वारपाला
नां सूक्तानि यथा रात्रिसूक्तं च रौद्रं च पावमानं सुमंगलं जयेतापोरुषसूक्तं पूर्वेतोवहिः यौ एष्यक अग्न
र्द्धं यांतरे श्रीसूक्तं पावमानं च सोमसूक्तं सुमंगलं शांत्यध्यायं चेंद्रसूक्तं रक्षोघ्नं चेति वक्ष्यंचौ तत्ररात्रिसू
क्तं प्रसिद्धं रौद्रं इमा रुद्रायेति पावमानं स्वादिष्ठयेति सुमंगलं कनिक्रददिति पुरुषसूक्तं प्रसिद्धं श्री
सूक्तमपि प्रसिद्धं सोमसूक्तं इमं स्तोमं शांत्यध्यायं शन्न इंद्राग्नी इंद्रसूक्तं योजातऽएव रक्षोघ्नं कृ
णुष्वेति एतानि सूक्तानि पूर्वे ऋग्वेदिनो पठितं अथ दक्षिणे यजुर्वेदिनो इमानि वक्ष्यमाणानि पठेत्
यथा शाकं सौम्यं च रौद्रं च कूष्मांडं शांतिमेव च पठेतां दक्षिणद्वारे ब्राह्मणौ तौ यजुर्वेदौ अनंत्र दक्षि
णे द्वारपालौ च रुद्रान् पुरुषसूक्तं श्लोकाध्यायं शुक्रियं च मंडलाध्यायमेव चेति शाकं आशुः
शिशानेत्यनुवाकः सौम्यं सोमो धेनुमिति षट् रौद्रं इमा रुद्राय षट् कूष्मांडं यद्देवा स्तिस्रः नमस्ते रु
द्र त्वध्यायः १ पुरुषसूक्तमपि सिद्धं श्लोकाध्यायो देवसवितः शुक्रियं ऋचं वाचं अध्यायः १ मंडलाध्या

यः

१

भ्रासरणं

61 मो परेतन्त्रकंडलं इतिइमानिदक्षिणद्वारेयजुर्वेदिनोपठेतां अथपश्चिमेसामवेदिनो॥ सोवर्णमथवैराज
माग्नेयंरुद्रसंहितां वामदेव्यंबृहत्सोमंरौरवंचरथंतरं गवांव्रतंविकर्णंचरक्षोघ्नंचयशस्तथा ज्ये
ष्ठंसामतथा ~~ज्येष्ठंसामतथा~~ शांतिंछंदोगोपश्चिमेस्थितौ॥ अमृतंवामदेव्यंबृहत्सामज्येष्ठंसाम
रथंतरं तथापुरुषसूक्तंचरुद्रसूक्तमतःपरं आज्यदोहानिसामानिशांतिकाध्यायएववभारं
डानिचसामानिपश्चिमद्वारपालको॥ सोवर्णंतु ग्रहेद्यविष्णुनामप्रमितिश्रीणाइसामकि वैरा
जंहोईयापिवआग्नेयंरुद्रसंहिता आवोराजानं वामदेव्यंकयानः बृहत्वामित्सोमंसंतेप
यांसि रौरवंपुनानःसोमः रथंतरंअभित्वाशूर गवांव्रतंगावोहाउतेमन्वतसामनी विश्वक
र्णंविभ्राट् रक्षोघ्नंवहरिद्राय ज्येष्ठंसाम मूर्द्धानंदिवः आज्यदोहानि हाउहाउहाउस्योहृम
शांतिसूक्तं अबोध्यग्निःपुरुषसूक्तंप्रसिद्धं देवव्रतानि अधिपतनाई भारंडानि इमंस्तोमममि
मादिना इतिसामवेदिनोपश्चिमद्वारेजपेतां अथोत्तरद्वारेअथर्ववेदिनोइमानिसूक्तानि ६१
जपेतां॥ यथा शांतिसूक्तंचसौरंचतथासाकलकंशुभं पौष्टिकंचमहाराजअपराजितमथर्वं

आंगिरसं २

वित् अस्मत्र अथर्वांगिरसं नीलरुद्रदेव्यपराजितां मधुसूक्तं रोधसं च --- शालघोषि कं॥ आ
थर्वण छंदोगायत्र हृद्रायँ आंगिरसे जन्मनः नीलरुद्रं आरुह्य पत्नेषु अपराजिता परिव
त्सरि मधुसूक्तं मधुवाता रोधसं अभयं द्यावापृथिवी मादि एतानि उत्तरद्वारे अथर्ववेदि
नो जपेतां॥ एवं नव कुण्डी पंच कुण्डी पक्षे कुण्डद्वारे विप्रा निसूक्तानि जपेयुः॥ कुंडैकपक्षे नैवे
ति अथ ऋग्वेदादि पारायणं पाठकाभ्यापि पूर्वादिद्वारे वेदपारायणं कुर्युरिति ३॥ आचम्य प्राणा
नायम्य देशकालौ संकीर्त्य गोत्रोमुकशर्माहं श्रीमहारुद्रयज्ञकर्मणि सकलगणकारकबहुर्
निषेकादिक्रियासंपादनं करिष्ये॥ इति संकल्प्य॥ तत्र पूर्वं तारेणाज्याहुतीः १६ जुहुयात् ॐ स्वा
हा इति॥ प्रवेणाज्यमादाय ॐ गर्भाधानं संपद्यंतां स्वाहा २ ॐ पुंसवनं संपद्यंतां स्वाहा ३ ॐ जातकर्म
संपद्यंतां स्वाहा ४ नामकर्मणि शान्तमंगल नामासि त्वं हुताशनेति नाम कृत्वा ॐ नामकर्म संपद्यं
तां स्वाहा ५ ॐ निष्क्रमणिकाकर्म संपद्यंतां स्वाहा ६ ॐ अन्नप्राशनं संपद्यंतां स्वाहा ७ ॐ चौल
कर्म संपद्यंतां स्वाहा ८ ॐ मुपनयनं संपद्यंतां स्वाहा ९ ॐ सावित्रं संपद्यंतां स्वाहा १० ॐमग्वेद

६२ दि चतुर्थ पवेदव्रतं संपद्यतां स्वाहा ११ ॐ मुपाकर्म संपद्यतां स्वाहा १२ ॐ मुत्सर्जनं संपद्यतां स्वाहा
१३ केशान्तं संपद्यतां स्वाहा १४ ॐ समावर्तनं संपद्यतां स्वाहा १५ ॐ पाणिग्रहणं संपद्यतां स्वाहा
१६ इति हुत्वा केचिद्दश संस्काराणि जुहुति ॥ गर्भे कर्मत्रयं जाते जातकर्मादि नामच ध्याना
दुःस्वनं तेच चौलोपनयनानि च स्नानोद्वाहौ ध्रुवे रोवं कुर्वन्त्येके क्रियादशेति ॥ ॥ अ
थ वातंत्रेण ॥ सकलजन्मकारकं व क्रेगर्भाधानादि क्रियाः संपद्यतां स्वाहा इति एका हुति
नैव संस्कारं कुर्यात् इत्यग्निसंस्कारविधिः ॥ ॥ ततः स्रुवेणाज्य मादाय जिह्वाभ्यो हो
मं कुर्यात् ॐ स्क्रूं पद्मरागायै अग्निजिह्वायै स्वाहा इदं प० ॐ य्क्रूं भद्रलोहितायै अग्निजिह्वा
यै स्वाहा इदं० ॐ श्क्रूं सुवर्णायै अग्निजिह्वायै० इदं सुवर्णायै० ॐ क्रूं लोहितायै अग्निजि
ह्वायै स्वाहा इदं लोहितायै० ॐ म्ल्क्रूं श्वेतायै अग्निजिह्वायै स्वाहा इदं श्वेतायै० ॐ क्रूं धूमि
न्यै अग्निजिह्वायै स्वाहा इदं धूमिन्यै० ॐ ष्क्रूं करालै अग्निजिह्वायै स्वाहा इदं करालै० ॐ
सत्स्वार्चिषे स्वाहा इदं स० ॐ स्वस्तिपूर्णाय स्वाहा इदं स्व० ॐ [illegible] स्वाहा इदं

जिह्वायै० ओं धूम्रव्यापिनेस्वाहा इदं धू० ओं सप्तजिह्वायस्वाहा इदं स० ओं धनुर्द्धरायस्वाहा इदं ध० ओं अग्न
ये जातवेदसे स्वाहा इदमग्नये जातवेदसे न मम ओं अग्नये सप्तजिह्वायस्वाहा. इदमग्नये सप्त० ओं म
ग्नये हव्यवाहनायस्वाहा इदमग्नये ह० ओं मग्नये अश्वोदरायस्वाहा इदमग्नये अ० ओं अग्नये वै
श्वानरायस्वाहा इदमग्नये वैश्वा० ओं अग्नये कौमारतेजसे स्वाहा इदमग्नये कौमारते० ओं अग्न
यै विश्वमुखायस्वाहा इदमग्नये वि० ओं मग्नये विश्वमुखायस्वा० इदमग्नमेदं० अथ जिह्वेकपक
रणीं तनुजिह्वाभिधारणं बीजपूर्वं ओं स्फूं पद्मरागाभद्रलोहिम्यांस्वाहा १ ओं ध्रूं भद्रलोहिनासु
वर्णाभ्यांस्वाहा २ ओं ष्फ्रूं सुवर्णालोहिताभ्यांस्वाहा ३ ओं वं लोहिताश्वेताभ्यांस्वाहा ४ ओं क्रूं
श्वेताधूम्रिनीभ्यांस्वाहा ५ ओं क्रूं धूम्रिनी करालीभ्यांस्वाहा ६ इति जिह्वैकपकरणीं॥ ततोग्निं
मार्च्चयेत् ओं मग्नेत्वमेश्वरं तेजः पावनं परमं हि यत् तस्मात्वदीय हस्तमेभ्मी हदं तर्पयाम्य हं॥ इत्यु
क्त्वा अग्नेः पूर्ववत् मंडूकादिपरतत्वांतं पीठं विचिंत्य गंधपुष्पैरभ्यर्च्य दलेषु प्राक्तिः पूजयेत्
ओं वामायै नमः॥ ओं ज्येष्ठायै नमः॥ ओं रौद्र्यै नमः ओं काल्यै नमः॥ ओं कलविकरण्यै नमः ५ ओं व

लविकरणाये नमः ६ ॐ बलप्रमथिन्यै नमः ७ ॐ सर्वभूतदमन्यै नमः ८ मध्ये ॐ मनोन्मन्यै नमः पुष्पांजलिं ग
63 हीत्वा ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानंताय योगपीठात्मने नमः ॥ इति पुष्पांजलिं दत्वा
ततः पुष्पांजलिं नाहृदंबुजात् श्रीरुद्रं ध्यात्वा पुनस्तनारेण सुषुम्णया नासारंध्रश्वाससमीरेण पुष्पांजलावा
नीय आत्मनो पीठमागतं शिवं भावयित्वा आगतो पुष्पांजलिं दत्वा श्रीरुद्र त्वमागतो भव १ सुप्रतिष्ठितो भ
व २ संनिहितो भव ३ सुमुखो भव ४ सुप्रसन्नो भवेति मुद्राः प्रदर्श्य भो हर आवाहनं त्वं रुद्रात्मको भ
व इति विज्ञाप्य परे वागन्यो स्वकं भावयित्वा ॥ ॐ रुद्रमागतेति पूर्ववत् प्राणप्रतिष्ठां कृत्वा दशाक्षरं न्यसे
त् ॐ हृदयाय नमः १ नमः शिरसे स्वाहा २ भर्गनेत्र शिखायै वौषट् ३ वं ते कवचाय हुं ४ रुद्रां नेत्र
त्रयाय वौषट् ५ यं अस्त्राय फट् ६ इत्यग्नो षडंगं विधाय पूर्ववत् पाद्यादिभोऽप्युपचारैरर्गिनेपूज
येत् तद्यथा ॐ शिवासनाय नमः पाद्यं समर्पयामि एवं मन्त्रेः अर्घ्यादि पुष्पान्तं संपूजयित्वा ततो वाममभा
गे गौर्यै नमः पश्चात् सद्योजाताय नमः १ वामे वामदेवाय नमः २ दक्षे अघोराय नमः ३ पूर्वे तत्पुरु
षाय नमः ४ मध्ये ईशानाय नमः ५ पूर्वादि द्वारेषु ॐ गं गणपतये नमः १ नथा स्कंदाय नमः २ ॐ ६३

पुष्पदंताय० ३ ॐ कपर्दिने० ४ ॐ नंदिने० ५ ॐ चंडाय० ६ ॐ महाकालाय० ७ ॐ भृंगिणे ८ ॥ ततो द्वारे
पुरतः ॐ वृषभाय० १ दिक्षु० इंद्राय० १ अग्नये० २ यमाय० ३ निर्ऋतये० ४ वरुणाय० ५ वायवे० ६ सो
माय० ७ ईशानाय० ८ ई० ए० ब्रह्मणे० ९ प० नि० अनंताय० १० तद्बहिः ॥ सर्वपार्षदेभ्यो नमः ॥ एताः नु गंध
पुष्पैरभ्यर्च्य ॐ शिवाग्नये सपरिवाराय नमो धूपं स० दीपं० नैवेद्यं० आच० तांबूलपूगीफलं ॥ दक्षि
णां ॥ पुष्पांजलिः एवं अग्निपूजनं कुर्यात् ॥ इति रुद्राग्न्यो रैकं ॥ तत आज्येन ॥ ॐ सद्योजातायस्वा
हा १ ॐ वामदेवाय स्वाहा २ ॐ मघोराय स्वाहा ३ ॐ तत्पुरुषाय स्वाहा ४ ॐ मीशानाय स्वाहा ५ इति
वक्त्राभिघारः ॥ अथ वक्त्रैकं ॥ स्रुवेणाज्यमाराय ॥ ॐ सद्योजातवामदेवाभ्यां छ स्वाहा ॐ वामदेवा
घोराभ्यां छ स्वाहा ३ ॐ मघोरतत्पुरुषाभ्यां छ स्वाहा ३ ॐ तत्पुरुषेशानाभ्यां छ स्वाहा ४ यथा दैवतंता
नः ॥ इति वक्त्रैक्यकरणं ॥ पुनः स्रुवेण ॐ फट् वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि
साधय स्वाहा इत्याहुतित्रयं हुत्वा ॥ शिवाग्निं प्रणमेत् ॥ ततो गुरुः यजद्ध्वमिति होमकाले ब्रूयात् ॥ य
ठद्ध्वमिति पाठकाः श्रुते च ॥ यावत्कर्मसमाप्यते तावच्छांतिसूक्तानि पठेयुः ॥ ॥ अथ होमः ॥ तत्र

सर्वे होतारः स्वासने उपविश्य ॥ आचम्य ऋत्विग्यम्मुखस्त्वेक तंत्रेणैव मध्ये गणपतिं स्मरेत् सर्वमं
गलमांगल्ये सारिना कुलदेवतां ॥ ॥ यजमानऋत्विग्भ्यः द्रव्यत्यागं कुर्यात् ॥ तद्यथा ॥ हस्ते जलं गृही
त्वा देशकालसंकीर्तनांते गोत्रोऽमुकशर्माहं ममामुककामनया ब्राह्मणद्वारा कारित सप्तमीमहारु
द्रजपस्य सांगतासिध्यर्थं जपदशांश संख्यया सम्ह होमकर्मणि श्रीरुद्राय साधपरिवाराय यही मार्य
मिदं तिलाज्यादिद्रव्यं मया परित्यक्तमिति जलं मुक्त्वा ॥ इति त्यागः ॥ तत्र सांप्रदायः ॥ वास्तोष्पते प्रती
सादि वास्तुहोमं समापयेत् ग्रह देवाधिदेवांश्च लोकपालांश्च पंच च इद्वात्रिंश देवताहुत्वा वसि
ष्ठोक्तविधानतः ग्रहयज्ञं समग्रं वा समाप्यरुद्रईश्मते ॥ शंभुवायचउंगानि स्वांते ब्रुमयमं न्यसेदिति
॥ ॥ तत्र सर्वे होतारो हस्ते जलं गृहीत्वा ॥ ॐ नमः शंभवायेति परमेष्ठी प्रजापतिऋषिः शंभुर्दे
वता यजुः छंदः । नमः शिवायेति बीजं । शिवतराये शक्तिः न्यासे विनियोगः ॥ ततो न्यासः ॐ नमः
शंभवायांगुष्ठाभ्यां नमः ॥ ॐ मयोभवाय तर्जनीभ्यां नमः ॥ ॐ नमः शंकराय मध्यमाभ्यां नमः
ॐ नमो मयस्काराय अनामिकाभ्यां नमः ॥ ॐ नमः शिवाय कनिष्ठिकाभ्यां नमः ॥ ॐ नमः

शिव १

नराय करतलकरपृष्ठाभ्यां नमः॥ इति करन्यासः अथ हृदयादि: ॐ नमः शंभवाय हृदयाय नमः॥
ॐ नमो मयोभवाय शिरसे स्वाहा॥ ॐ नमः शंकराय शिखायै वषट् ॐ नमः मयस्कराय कवचाय हुं ॐ न
मः शिवाय नेत्रत्रयाय वौषट् ॐ नमः शिवतराय अस्त्राय फट्॥ ॥ मंत्रविभागहोमपक्षेऽपि अस्त्रनेनै
व न्यासः॥ एवं सर्वैः आचार्यैः एवंकाः न्यासं विधाय॥ चेत् पूर्वं वास्तुपूजनावसरे वास्तुहोमः पंचक
स्यं दिक्षु न कृतः स्यात् तदा अत्र करणीयः [illegible]तन ॐ वास्तोष्पते प्रतिजानी॰ इति मंत्रेण सिद्धेन चरुणा अष्टो
त्तरशतं हुत्वा नाममंत्रेण स्थापितदेव[illegible]ः तासां नाम एकैकाहुतिं दत्वा ग्रहहोमं कुर्यात् सर्वैः होमका
मासन्तराः हस्ते जलं गृहीत्वा अमुकगोत्रोऽमुकशर्माहं गोत्रस्याऽमुकशर्मणो यजमानस्य अमुक
ककामनासिध्यर्थं कृतस्य महारुद्ररूपस्य सांगतासिध्यर्थं समिति लाज्य पायसादिद्रव्यैः ग्रहहो
म पूर्वकं श्रीमहारुद्रजपदशांशं होमं करिष्ये॥ इति संकल्पः॥ तत्रादौ सप्तलोकपालानां होमः अ
थ सप्ताधि अनंतांत होमः॥ अथ अजरादि पंचाशत् क्षेत्रपालहोमः अथ जयादि चतुःषष्टियो
गिनीभ्यो होमः॥ एतानि सर्वं वसिष्ठ शांतौ द्रष्टव्यं॥ ॥ अथ श्रीमहारुद्रहोमक्रमो निरूप्यते

आचार्य ५४

तत्र होमद्रव्याणि वृहत्पराशरः ॥ अश्वत्थानां वाति लाजा चापि च हैमवास मिधोपि वा ॥ शंभवायेति जुहुया
65 त्सर्वांस्तानामसि विना नृसारसं यवं हे मन्हासणाया निचोक्तानि सतिलाज्यानि तानि वै ॥ विल्वस्य
वै प्रियं शंभोः समिन्मूलं फलं दलं अन्यद्व पद्याहितं मलोके यवाति प्रियमात्मनः अनु रुद्राय होतव्यं
सर्वैस्त्रिमधुसंयुतं ॥ अथ यन्त्रान्तरे ॥ रुद्रजपस्तु पंचधोक्तः ॥ तत्र सत्व मंत्रसंख्योक्ता मंत्रविभागे ना
हुतपो होतव्याः ॥ अथ यवान वस्त्रू नशतान्यष्टौ सहस्राणि दशैव तु ख्यातो होमो दशांशो यं महारु
द्रे मनीषिभिरिमेता आहुतयः शंभवायेति मंत्रेण पराशर वचनाद्धोतव्याः ॥ परशुराममंगलादिवेदि
सप्तहोम समस्ततिभिराचार्यैर्महारुद्रहोमे मयप्साः कथितास्तेषां मध्ये नमः शंभवायेति मंत्रेण होमपक्षो मुख्यः
तत्रवो द्वायनस्तु ॥ रुद्र रुद्री लघुरुद्र महारुद्रातिरुद्रेषु मंत्रसंख्यामनपक्षेव नमः शंभवायेत्यनेनैव
मंत्रेण सिद्धामेव होमसंख्यामतिपादितवान् ॥ यथा व्रतखंडे ॥ ततो होमं प्रकुर्वीत नमः शंभेति मं
त्रतः रुद्रैकादशिनीजाप्ये तिस्त्रस्त्रिंदशाचाहुतीः ॥ रुद्रे शान्तत्रयं मोक्तं शाष्ट्या अधिकयान्वितं च
त्वारश्च महारुद्रे सहस्राः ससवर्ज्जिताः ॥ चत्वारिंशत्सहस्राण्यकर्त्तव्यास्त्वतिरुद्रगः ऊनाश्च स ६५

मसमस्मात्वतिरुद्रेहिनिश्चयइति॥ ॥ब्रह्मराक्षसोप्यनेनैवमंत्रेण संख्यांतरमाह पंचपंचाशषट्स्वाल
क्षा अक्षरा वथापि वा दश दशैकादश वा जुहुयात्साधको द्विजः॥ इति होमकर्मनिरूपणं॥ ॐ या ते रुद्र
शिवा तनूरिति मंत्रस्य प्रजापति ऋषिः उमादेवी देवता अनुष्टुप् छंदः पार्वतीप्रीत्यर्थं यथाशक्ति
रितिपा४ होमे विनियोगः ॐ या ते रुद्र शिवा तनूर्वैसै [illegible] नतो ऋत्विजः श्रीमहारुद्रहोमं समाप्य ॐ नमः शं
भवायेति मंत्रस्य परमेष्ठी ऋषिः शंभुर्देवता यजुश्छंदः नमः शिवायेति बीजं शिवतरायेति शक्तिः महा
रुद्रप्रीत्यर्थं महारुद्रजपदशांश होमे विनियोगः अथ नामभिः स्रुवेणाज्यं पायसं समित्तिलादिना
वा पीठदेवताभ्य आवरणदेवताभ्यश्च जुहुयात्॥ तद्यथा ॐ आधारशक्त्यै स्वाहा ॐ मूलप्रकृत्यै·
ॐ मंडूकाय· ॐ कालाग्निरुद्राय· ॐ कूर्माय· ॐ अनंताय· ॐ पृथिव्यै· ॐ कंदाय· ॐ अंकुराय·
·ॐ नीलांकुशमराय· ॐ पद्माय· ॐ पत्रेभ्यः· ॐ केसरेभ्यः· ॐ कर्णिकायै· ॐ महासनाय·
ॐ अधर्माय· ॐ अज्ञानाय· ॐ अवैराग्याय· ॐ अनैश्वर्याय· ॐ धर्माय· ॐ ज्ञानाय· ॐ वैराग्या
य· ॐ ऐश्वर्याय· ॐ [illegible]· ॐ सत्वाय· ॐ रजसे· ॐ तमसे· ॐ अग्निमंडलाय· ॐ सोममंडलाय·

सं.११०९८

ॐ सूर्यमंडलाय· ॐ मायातत्वाय स्वाहा ॐ कलातत्वाय· ॐ विद्यातत्वाय· ॐ शिवतत्वाय· ॐ आत्म
ने· ॐ अंतरात्मने॰ ॐ जीवात्मने· ॐ परमात्मने॰ ॐ रुद्राय स्वाहा ॐ शर्वाय· ॐ पशुपतये॰ ॐ उग्रा
66 य· ॐ महशानये॰ ॐ भवाय॰ ॐ महादेवाय· ॐ ईशानाय॰ ॐ वामायै॰ ॐ ज्येष्ठायै· ॐ रौद्र्यै॰ ॐ का
ल्यै ॐ कलविकरण्यै॰ ॐ बलविकरण्यै· ॐ बलप्रमथन्यै॰ ॐ सर्वभूतदमन्यै॰ ॐ मनोन्मन्यै॰
ॐ नमो भगवते सकलगुणात्मकशक्तियुक्तायानंताय योगपीठाय नमः स्वाहा इति पीठदेवता होमः
अथ पंचदेवताभ्यो विशेषहोमः॥ ॐ अघोराय स्वाहा॥ ॐ पशुपतये॰ ॐ शर्वाय· ॐ विरूपाय· ॐ
विश्वरूपिणे॰ ॐ त्र्यंबकाय· ॐ कपर्दिने॰ ॐ भैरवाय· ॐ शूलपाणये॰ ॐ ईशानाय॰ ॐ महेशा
य· ॐ उमायै· ॐ शंकरप्रियायै· ॐ गौर्यै· ॐ पार्वत्यै· ॐ कालिंद्यै· ॐ कोटर्यै. ॐ विश्वधारिण्यै॰
ॐ गंगायै· ॐ गणपतये· ॐ स्वामिकुमाराय· ॐ पुष्पदंताय· ॐ नंदिने· ॐ महाकालाय· ॐ भृंगि
रिटये· ॐ स्कंदाय· ॐ चंडाय· ॐ इंद्राय· ॐ अग्नये· ॐ यमाय· ॐ निर्ऋतये· ॐ वरुणाय· ॐ वाय
वे· ॐ सोमाय· ॐ ईशानाय· ॐ ब्रह्मणे· ॐ अनंताय· ॐ सूर्याय· ॐ चंद्रमसे॰ ॐ भौमाय॰ ॐ बु ६६

ॐ कपर्दिने ०२

धाय॰ ॐ गुरवे॰ ॐ शुक्राय॰ ॐ शनैश्चराय॰ ॐ राहवे॰ ॐ केतवे॰ इतियंत्रदेवताभ्योहुत्वा आवरण
होमं कुर्यात्॥ ॐ मध्यमंमूलेन श्रीमहारुद्रायस्वाहा ॐ सद्योजाताय नमस्वाहा॰ ॐ वामदेवाय॰
ॐ अघोराय॰ ॐ तत्पुरुषाय॰ ॐ ईशानाय॰ ॐ नंदिने॰ ॐ महाकालाय॰ ॐ गणेश्वराय॰ ॐ वृषभा
य॰ ॐ भृंगिरिटये॰ ॐ स्कंदाय॰ ॐ उमायै॰ ॐ चंडाय॰ १ ॐ अनंताय॰ ॐ सूक्ष्माय॰ ॐ शिवाय॰
ः ॐ शिवाय॰ ॐ एकपादाय॰ ॐ एकरुद्राय॰ ॐ त्रिमूर्तये ॐ श्रीकंठाय॰ ॐ वामदेवाय॰ ॐ ज्येष्ठा
य॰ ॐ श्रेष्ठाय॰ ॐ रुद्राय॰ ॐ कालायस्वाहा ॐ कलविकरणायस्वाहा ॐ बलाय॰ ॐ बलविकर
णाय॰ ॐ बलप्रमथनाय॰ २ ॐ अणिमायै॰ ॐ महिमायै॰ ॐ लघिमायै॰ ॐ गरिमायै॰ ॐ प्राप्त्यै॰
ॐ प्राकाम्ये॰ ॐ ईशितायै॰ ॐ वशितायै॰ ॐ ब्राह्म्यै॰ ॐ माहेश्वर्यैः ॐ कौमार्यै॰ ॐ वैष्णव्यै॰ ॐ
वाराह्यै॰ ॐ इंद्राण्यै॰ ॐ चामुंडायै॰ ॐ चंडिकायै॰ ॐ असितांगभैरवाय॰ ॐ रुरुभैरवाय॰ ॐ
चंडभैरवाय॰ ॐ क्रोधभैरवाय॰ ॐ उन्मत्तभैरवाय॰ ॐ कपालभैरवाय॰ ॐ भीषणभैरवाय॰ २
ॐ संहारभैरवाय॰ ३ ॐ भवायस्वाहा ॐ शिवाय॰ ॐ रुद्राय॰ ॐ रुद्राय॰ ॐ ईशानाय॰ ॐ पशु

पतये॰ ॐ भीमाय॰ ॐ उग्राय॰ ॐ महादेवाय॰ ॐ अनंताय॰ ॐ शुक्रये॰ ॐ तक्षकाय॰ ॐ कुलीरकाय॰
67 ॐ कर्कोटकाय॰ ॐ शंखपालाय॰ ॥ ॐ कंबलाय॰ ॐ अश्वतराय॰ ॐ वैदैभ्याय॰ ॐ रथवे॰ ॐ हैह
याय॰ ॐ अर्जुनाय॰ ॐ शाकुंतलाय॰ ॐ भरताय॰ ॐ नलाय॰ ॐ रामाय॰ ॐ हिमवते॰ ॐ निषधाय॰
ॐ विंध्याय॰ ॐ मलयाय॰ ॐ पारिजाताय॰ ॐ मलयाचलाय॰ ॐ हेमकूटाय॰ ॐ गंधमादनाय स्वाहा
॥ ॥ ॐ इंद्राय स्वाहा ॐ अग्नये॰ ॐ यमाय॰ ॐ निर्ऋतये॰ ॐ वरुणाय॰ ॐ वायवे॰ ॐ कुबेराय॰ ॐ मी
शानाय॰ ॐ शच्यै॰ ॐ स्वाहायै॰ ॐ वाराह्यै॰ ॐ वह्निन्यै॰ ॐ वारुण्यै॰ ॐ मृगारूढायै॰ ॐ कौबेर्य्यै॰ ॐ
मालिन्यै॰ ॐ वज्राय॰ ॐ शक्तये॰ ॐ दंडाय॰ ॐ खड्गाय॰ ॐ पाशाय॰ ॐ ध्वजायै॰ ॐ गदायै॰ ॐ त्रि
शूलाय॰ ॐ गजाय॰ ॐ मेषाय॰ ॐ महिषाय॰ ॐ प्रेताय॰ ॐ मकराय॰ ॐ मृगाय॰ ॐ नराय॰ ॐ वृष
भाय॰ ॐ ऐरावताय॰ ॐ पुंडरीकाय॰ ॐ वामनाय॰ ॐ कुमुदाय॰ ॐ अंजनाय॰ ॐ पुष्पदंताय॰ ॐ सा
र्वभौमाय॰ ॐ सुप्रतीकाय॰ पुनः ॐ इंद्राय॰ ॐ अग्नये॰ ॐ यमाय॰ ॐ निर्ऋतये॰ ॐ वरुणाय॰ ॐ ६१
वायवे॰ ॐ कुबेराय॰ ॐ ईशानाय॰ ॐ विरूपाय॰ ॐ पशुपतये॰ ॐ ऊर्ध्वलिंगाय॰ ॐ शेषाय श्वेतरू

पाय विप्रवर्णाय सहस्रफणाय नमः स्वाहा ॐ तक्षकाय नीलरूपाय वैश्यवर्णाय पंचशतफणा
य नमः स्वाहा ॐ अनंताय कुंकुमरूपाय विप्रवर्णाय सहस्रफणाय नमः स्वाहा ॐ वासुकये श्वेतरू
पाय क्षत्रियवर्णाय सप्तशतफणाय नमः स्वाहा ॐ शंखपालाय पीतरूपाय क्षत्रियवर्णाय सप्तश
तफणाय नमः स्वाहा ॐ महापद्माय नीलरूपाय वैश्यवर्णाय पंचशतफणाय नमः स्वाहा ॐ कंब
लाय कुसुमरूपाय शूद्रवर्णाय त्रिंशत्फणाय नमः स्वाहा ॐ कर्कोटकाय श्वेतरूपाय शूद्रवर्णाय त्रिंश
त्फणाय नमः स्वाहा इत्यावरणदेवताभ्यो जुहुयात् ॥ इति परिवारदेवतानामाज्येन होमः तत्रापि
मंडूकादिदेवतानामेकैकाहुतिर्वा [illegible] होमः ॥ अथ यो पहोदशादि परिएस्रवको भवति तस्मै तद्
ब्येण होमः कार्यः मंत्रपदपूर्वकः ॥ एवं रुद्रकुंडे रुद्रमिष्टा रुद्राणीं चेष्ट्वा विशेषहोमं कुर्यात् ॥ अथ
विशेषहोमः ॥ नाममंत्रैर्गणेशस्कंदपुष्पदंतकपर्दिनं नंदिचंद्रमहाकालभृंगीशाणो होतिलैर्यजेत् एते
षां चतुर्थ्यंत नामानि ॥ ॐ गणेशाय स्वाहा ॥ ॐ स्कंदाय ॐ पुष्पदंताय ॐ कपर्दिने ॐ नंदिने ॐ चं
द्राय ॐ महाकालाय ॐ भृंगीशे ॐ इति तिलैर्याज्येन होमः कार्यः ॥ ॥ तदुके न गणेशं च

x मंत्रेण बंधाद्यतेन लक्ष्म्यै· कल्पलतायां नानाद्रव्यैः· विश्वानिदेवसवितरिति मंत्रेण तिलादिनाऽभयंकराय· चोदयित्री सूनृतानामिति मंत्रेण पायसद्रव्येण सरस्वत्यै· अग्नीवरुणाभ्यां घृतेन इति मंत्रेण इध्मोदनं वास्तवे
त्र्यंबकं यजामहे इतिमंत्रेण गुग्गुलु द्रव्येण दूर्वा गुडूची वेत्रैः दुरितापहर्त्र्यै ॥ इति विशेषहोमः। अथ होमसाकल्यार्थं सर्वदेवतात्मकेन व्याहृतिमंत्रेण यवमिश्रतिलाज्येन यथासंख्यं जुहुयात् तत्र यथा ओं भूः स्वाहा ओं भुवः स्वाहा ओं स्वः
स्वाहा ओं भूर्भुवः स्वः स्वाहा। इत्येकाहुतिः एवं यथासंख्यं व्याहृति होमं त्यागरहितं समाप्य जयादिहोमं कुर्यात्। अथ जयाहोमः ओं चित्तं चेति परमेष्ठी· चित्तं यजुर्होमे वि· ओं चित्तं च स्वाहा इदं चित्ताय· ओं चित्तिश्चेति परमेष्ठी चि

68 दुर्गांदूर्वाज्यसर्षपैः ॥ त्र्यंबकं गुग्गुलुद्रव्यैः सर्षपैर्जातवेदसं सवितारं तिलाज्येन विष्णुरिध्मोदनेन
च श्रियं पंचामृतेनैव दिक्पालान्तिलसर्पिषा स्वैः स्वैर्मंत्रैर्यजेत्सर्वान् यथासंख्यगणादिकान्।
ततो व्याहृति होमश्च कर्त्तव्यः स्वेच्छयातिलैः जयादीन् जुहुयाद्धा यश्चर्द्धिकामो यथाविधिः जया
भ्यातानाश्च कूष्मांडीरिति चित्तं चेत्यादिर्जयसंज्ञा अभ्याताना अग्निर्भूतेनामादयः ॥ कूष्मांडीर्यद्दे।
६ वास्तिस्वैद्भृति॥ अपलडुके गणानां त्वेति गणेशाय॥ ॥ ओं जातवेदसे सुन० इतिमंत्रेण सर्षपे।
पादिना दुर्गायै ॥ ओं त्र्यंबकं यजामहे इतिमंत्रेण गुग्गुलद्रव्येण त्र्यंबकाय॥ ओं अग्निरस्मिज
न्मना इतिमंत्रेण तिलाज्येन सवित्रे॥ ओं इदं विष्णुर्विचक्रमे० इतिमंत्रेण इध्मोदनेन विष्णवे॥ ओं
श्रीश्चते लक्ष्मीश्चेति परमेष्ठी ऋ० आकूतिर्दे० यजुश्छं० होमे वि० ओं आकूतिश्च स्वाहा इदमाकू
त्यै॥ ओं विज्ञातिश्चेति परमेष्ठी विज्ञातिर्यजुर्होमे वि० ओं विज्ञातिश्च स्वाहा इदं विज्ञात्यै ओं मनसश्चे
ति परमेष्ठी मनो यजुर्होमे वि० ओं मनश्च स्वाहा इदं मनसे ओं शाकरीश्चेति परमेष्ठी शाक्वर्यो यजुर्हो०
ओं शाकरीभ्यश्च स्वाहा इदं शाकरीभ्यः दर्शश्चेति परमेष्ठी दर्शो यजुर्होमे० ओं दर्शश्च स्वाहा इदं दर्शा ६८

त्तिर्यजुर्होमे विनियोगः ओं चित्तिश्च स्वाहा इदं चित्त्यै ओं आकूतं चेति परमेष्ठी आकूतं यजुर्होमे विनि० ओं आकूतं च स्वाहा इदमाकूताय ओं आकूतिश्चेति x८

ओं विज्ञातं चेति परमेष्ठी ऋ० विज्ञातं दे० यजुः छं० होमे वि० विज्ञातं च स्वाहा इदं विज्ञाताय

९ पौर्णमासं चेति परमेष्ठी पौर्णमासं यजुर्होमे॰ ओं पौर्णमासं च स्वाहा इदं पौर्णमासाय॥ ओं बृहच्चेति परमेष्ठी
बृहद्यजुर्होमे॰ ओं बृहच्च स्वाहा इदं बृहते रथंतरं चेति परमेष्ठी रथंतरं यजुर्हो॰ ओं रथंतरं च स्वाहा इदं
रथंतराय ओं प्रजापतिरिति परमेष्ठी ऋषि प्रजापतिर्जयानिंद्रो देवता त्रिष्टुप् छंदो होमे विनियोगः॥
ओं प्रजापतिर्जयानिंद्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु तस्मै विशः समनमंत सर्वाः स उग्रः स इ ह
व्यो बभूव स्वाहा इदं प्रजापतये जयानिंद्राय इति जया होमः अथाभ्यातानां ओं अग्निर्भूतानामि
ति प्रजापति ऋषिरग्निर्भूतानामधिपतिर्देवता त्रिष्टुप् छंदो होमे विनियोगः ओं अग्निर्भूतानामधि
पतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वा
हा इदमग्नये भूतानामधिपतये ओं इंद्रो ज्येष्ठानामिति प्रजाप॰ ऋषिरिंद्रो ज्येष्ठानामधिपतिर्दे॰ त्रिष्टुप् छं॰
हो॰ ओं इंद्रो ज्येष्ठानामधिपतिः स मा॰ इदमिंद्राय ज्येष्ठानामधिपतये ओं यमः पृथिव्या इति प्रजाप
ति ऋ॰ यमः पृथिव्यानामधिपतिर्दे॰ त्रिष्टुप् छं॰ होमे॰ ओं यमः पृथिव्यानामधिपतिः स मा॰ इदं यमाय
पृथिव्यानामधिपतये उदकोपस्पर्शनं ओं वायुरंतरिक्षस्येति प्रजा॰ वायुरंतरिक्षस्याधिपतिर्दे॰ त्रि

ष्टुप्छं॰ होमे॰ ओं वायुरंतरिक्षस्याधिपति॰ इदं वायवेंतरिक्षस्याधिपतये ओं सूर्य इति प्रजापतिऋ॰ सू
६६ र्यो दिवोधिपतिर्दै॰ त्रिष्टु॰ हो॰ ओं सूर्यो दिवोधिपतिः समा॰ इदं सूर्याय दिवोधिपतये ओं चंद्रमा इति प्रजाप
69 तिऋ॰ चंद्रमा नक्षत्राणामधिपतिर्दैव॰ त्रिष्टु॰ हो॰ ओं चंद्रमा नक्षत्राणामधिपतिः स॰ इदं चंद्रमसे न
क्षत्राणामधिपतये ओं बृहस्पतीति प्रजा॰ बृहस्पतिर्ब्रह्मणोधिपतिर्दै॰ त्रिष्टु॰ हो॰ ओं बृहस्पतिर्ब्र
ह्मणोधिः स॰ इदं बृहस्पतये ब्रह्मणोधिपतये ओं मित्रः सत्यानामिति प्र॰ मित्रः सत्यानामधिपति
र्दै॰ त्रिष्टुप्छं॰ हो॰ ओं मित्रः सत्यानामधिपतिः समाव॰ इदं मित्राय सत्यानामधिपतये ओं वरुणोपा
मिति प्रजा॰ वरुणोपामधिपतिर्दै॰ त्रिष्टुप्छं॰ हो॰ ओं वरुणोपामधिपतिः स॰ इदं वरुणायापा
मधिपतये ओं समुद्र इति प्रजाप॰ समुद्रः स्रोत्यानामधिपतिर्दै॰ त्रिष्टुप्छं॰ हो॰ ओं समुद्रः स्रोत्या
नामधिपतिः स॰ इदं समुद्राय स्रोत्यानामधिपतये ओं अन्नं॰ साम्राज्यानामिति प्रजा॰ अन्नं॰
साम्राज्यानामधिपतिर्दै॰ त्रिष्टुप्छं॰ हो॰ ओं अन्नं॰ साम्राज्यानामधिपतिः स॰ इदं मन्नाय साम्रा ६९
ज्यानामधिपतये ओं सोम ओषधीनामिति प्रजा॰ सोम ओषधीनामधिपतिर्दै॰ त्रिष्टुप्छं॰ हो॰ ओं सो

मओषधीनामधिपतिः स॰ इदं॰ सोमायौषधीनामधिपतये ॐ सविताप्रसवानामिति प्रजापतिः॰
सविताप्रसवानामधिपतिर्दे॰ त्रिष्टुप्छं॰ हो॰ ॐ सविताप्रसवानामधिपतिः स॰ इदं सवित्रे प्रसवा
नामधिपतये ॐ रुद्रः पशूनामिति प्रजा॰ रुद्रः पशूनामधिपतिर्दे॰ त्रिष्टुप्छं॰ हो॰ ॐ रुद्रः पशूनामधि
पतिः स इदं रुद्राय पशूनामधिपतये उदकस्पर्शः ॐ त्वष्टा रूपाणामिति प्रजाप॰ त्वष्टा रूपाणामधिप
तिर्दे॰ त्रिष्टुप्छं॰ हो॰ ॐ त्वष्टा रूपाणामधिपतिः स मा व॰ इदं त्वष्ट्रे रूपाणामधिपतये ॐ विष्णुः पर्वता
नामिति प्रजा॰ विष्णुः पर्वतानामधिपतिर्दे॰ त्रिष्टुप्छं॰ हो॰ ॐ विष्णुः पर्वतानामधिपतिः स मा॰
~~इदं विष्णवे पर्वतानामधिपतिः स मा॰~~ इदं विष्णवे पर्वतानामधिपतये मरुतो गणानामिति प्रजा॰ म
रुतो गणानामधिपतिर्दे॰ हो॰ ~~ॐ मरुतो गणानामधिपतिर्दे॰ हो॰~~ ॐ मरुतो गणानामधिपतिः स॰ इदं
मरुद्भ्यो गणानामधिपतिभ्यः॥ ॐ पितरः पितामहा इति प्रजा॰ ~~पितरः पितामहा इति प्रजा॰~~ पितरः पि
तामहादे॰ त्रिष्टु॰ हो॰ ॐ पितरः पितामहाः परेवरे ततास्ततामहाः इह मा॰ इदं पितृभ्यः पितामहेभ्यः
परेभ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्यः॥ उदकोपस्पर्शनम् एते द्वादश मंत्रा अभ्याताना नामसंज्ञकाः

70 ॥·॥ ओं यद्देवा देवहेड० अग्नि० स्वाहा १ ओं यद्दिवा यदि न० वायुर्मा० हसः स्वाहा २ ओं यदि जाग
यदि स्वप्न० एनांसि० ॥ सूर्यो मा तस्मादे० स्वाहा ३ ३ ॥ अथात्राव
सरे नाममंत्रेण पंचाशत्क्षेत्रपालदेवताभ्यो जुहुयात् अथ जयादि चतुःषष्टियोगिनीभ्यो नाममं
त्रेण हुत्वा ॥ सूक्तपाठकानां सूक्तमंत्रैर्जुहुयादस्य क्रमस्तु विस्तरभयान्न लिखितः ॥ ॥ ततः स
र्वहविषां स्विष्टकृद्धोमः स च ब्रह्मणान्वारब्धो जुहुयात् ततो भूरादिनवाहुतयः तेषां विनियोगः प्रायश्चित्त संज्ञकाः
पूर्ववत् ॥ ॥ केचित् प्रधानहोमत्वात् रुद्रयज्ञं समाप्य वास्वादीनो होमं कुर्वंति ॥ ॥ इति होम
विधिः ॥ ॥ अथ बलिदानं स च गणपत्यादिकं नवग्रहबलिदानांतं वासिष्ठीप्रांतोद्दिष्ट
वं ॥ दिक्पालानां बलिदानक्रमो रुद्रपूजनमंजर्यां द्रष्टव्यः ॥ अग्नेः पश्चिमादि क्षेत्रपालपर्यंतं
वासिष्ठीप्रांतोद्दिष्टवं ततो मंडपाद्बहिः चतुर्दिक्षु गोमयोपलिसं भूमौ तत्र प्रथमं पूर्वस्यां दिशि मु३
शुचिस्थाने वक्ष्यमाणं मंत्रद्वयं पठित्वा पुष्पांजलिं दत्वा माषभक्तबलिं दद्यात् मंत्रौ तु त्रैलोक्ये
यानि भूतानि स्थावराणि चराणि च ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु तानि मे ॥ १ देवदान ७०

वांधर्वा यक्षराक्षसपन्नगाः ऋषयो मनवो गावो देवमातर एव च सर्वे ममाध्वरे रक्षां प्रकुर्वंतु मुदान्विताः इति
तत्र पुष्पांजलिं दत्वा ततः स्थैर्येव बलिं गृहीत्वा पठेत् ॥ बलिं गृह्णं त्विमे देवा आदित्या वसवस्तथा मरुतोथा-
श्विनौ रुद्राः सुपर्णाः पन्नगाग्रहाः शाकिन्यो यक्ष वेताला योगिन्यः पूतना शिवाः जंभकाः सिद्ध गंध
र्वा नागा विद्याधरा नगाः दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः जगतां शांतिकर्त्तारो ब्रह्मा
द्याश्च महर्षयः मा विघ्नमा च मे पापं मासंतु परिपंथिनः सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः
एतेभ्यो नमः तेभ्यो गंधादिकं बलिं वः स्वाहा इति जलं मुक्त्वा एवं दक्षिणापश्चिमोत्तरेषु देयः॥ ॥इति सा
र्वभौतिको बलिः इति बलिदानं समाप्तं अथाग्निपूजनं तिथ्यादि संकीर्त्तनांते गोत्रोऽमुकशर्माहं
मम अमुककामनया ब्राह्मणद्वारा सम्वत्सरश्रीमहारुद्रजपदशांशहवनसांगतासिध्यर्थं होमांते वैश्वा
नरपूजनमहं करिष्ये। ॐ शांतमंगलनामाग्नये नमः शिवाग्नये नमो वा पाद्यादिदक्षिणांतं पूजयित्वा॥
पुष्पांजलिं दद्यात् ॐ एषो ह देवः प्रदि० पुष्पांजलिं समर्पयामि अथ प्रार्थना॥ यस्य धूमध्वजो नित्यं
छागो यस्य च वाहनः जटा कपिल पिंगाक्षो महा वैश्वानरं नमः आग्नेत मेध्वरं तेजः पावमानं परं हिय

त् तस्मात्त्वरीयहृत्स्य मे श्रीरुद्र तोषयाम्यहं अग्निं प्रज्वलितं वंदे॰ इतिप्रार्थयित्वाप्रणमेत् इत्यग्निपूजनं॥
७१ अथपुनः पूजं आचम्यासनं स्थित्वा॥ देशकालसंकीर्तनांते गोत्रोऽमुकशर्माहं अमुककामनया त्वा स
णद्वाराकारितस्य श्रीमहारुद्रजपदशांश हवनसांगतासिद्ध्यर्थं श्रीमहारुद्रादिस्थापितदेवतानां पू
जनमहं करिष्ये परम्पुरामः अग्नि एवं विधायै वंदेवस्मोत्तरपूजनं कुर्या अंबकमंत्रेण गंधपुष्पाक्ष
तादिभिः ~~सद्योजातादिभिः~~ सद्योजातादिभिर्मंत्रैः पंचवक्त्राणि पूजयेत्॥ पूजयेद्गंधपुष्पाद्यैस्तथाव
रणदेवताः ततश्चंद्रनपुष्पाद्यैः पूजयेद्यंत्रदेवताः एवं संपूज्य देवेशं पश्चाद्धारी पूजयेत्ततः दुर्गागणप
तिक्षेत्रपालादीन् पूजयेत् क्रमात् यजमानानुकूलेषु भेदिनेषु लग्ने शुभवेलायां शुभेषु दूर्गे च होम
चंडवलिः संरक्ष्या परिपूर्णां कृत्वा पूर्णाहुतिं दद्यात् इतिश्लोकोक्तमार्गेण पुनः पूजनं कुर्यात् विस्तरभयात्सप्र
पंचं नालिखितं॥ अग्नेत्र पस्थानादिकं वासिष्ठी शांतौ दृष्टव्यं॥ ॥ अथ पूर्णाहुतिः॥ तत्कं च रुद्रमं
जप्यां पूर्णाहुतिं प्रकुर्वीत मंत्रैः फलसमन्वितां॥ अन्वाज्यं समानीयाग्निसमीपे स्रुक्स्रुवा वुभौ
तौ प्रतप्य च संमार्ग कुशैः संमज्य सिंचयेत् पुनः प्रतप्य याम्यायां निदध्यात् स्रुक्स्रुवौ च तौ आ ७१

समुद्रास्सचोत्तरस्यां वेद्यां पद्मनिष्कृतिः चतुर्गृहीतमाज्यं चरुग्रहीत्वा स्रुचिमध्यतः वस्त्रं तांबूल
पूर्णादिफलपुष्पसमन्वितां अधोमुखस्रुवच्छन्नां गंधमाल्याद्यलंकृतां पूर्वदक्षिणहस्तेन पश्चाद्वा
मेन पाणिना गृहीत्वा यत्स्रुचं कृत्वा शंखसन्निभमुद्रया वामस्तनांतमानीय नाभिमूलात् स्रुवं ततः
ॐ. त्रिभिः सहितो ध्वर्युर्जुहोत्यग्नौ समाहितः गीतवादित्रघोषेण कृत्विग्भिः सहितो यजमानः पू
र्णाहुतिं कुर्यात् ततो गुरुः तत्र विधिः आचम्य प्राणानायम्य अद्येत्यादि संकल्पं कृत्वा मम अमु
ककामनासिद्ध्यर्थं मत्कारित श्रीमहारुद्रजपहवनादि संपूर्णतासिद्ध्यर्थं पूर्णाहुतिहोममहं करिष्ये
।। इति संकल्पं कुर्यात् चतुर्गृहीतेनाज्येन स्रुचिं प्रपूर्य तत्र फलपुष्पवस्त्राक्षतकुंकुमतांबूलचर्चि
तं श्रीफलं विधाय पूर्णाहुत्यै नम इति नाममंत्रेण पाद्यादिदक्षिणांतं पूजयित्वा शंखमुद्रया तां स्रुचिं
अधोमुखस्रुवाच्छादितां वामस्तनांतमानीयोत्थाय तत्र मूर्द्धा ज्योतिरिति षट्।। वाजश्चेत्यादि सप्तवि
शति मंत्रैः रुद्राध्यायेन मह इच्छिरसा अस्त्रेण च केवलेन रुद्राध्यायेन वा तां जुहुयात् पूर्णाहुत्यनं
तरं।। मत्कर्मणा सरीरं च मित्यादि वाशिष्टी प्रांतो इत्येवं।। अथ वसोर्द्धारा तत्कर्त्तव्यता कथ्यते

× हुत्वा पूर्णेव दद्यात्पुष्पांजलिं दत्वा पूर्णाहुतिरेतस्त्वा। ॐ पूर्णाहुतिमुत्तमां जुहोमि सर्वं वै पूर्णाहुतिः सर्वमेवाप्नोति अथो इयं वै पूर्णाहुति मस्यामेव प्रतितिष्ठति। ततो गुरुः शिवा
यचे नमः स्कंदाय नमः। तथा ... नमः स्कंदाय ततः परमेष्ठिने [illegible] ... दत्वा ४२ रू १

उर्ध्वो दह्यस्वेति ॥ एवं द्रुणो हुतिं कृत्वा वसोर्द्धारामतः परं घृतेनाच्छिन्नधारेण कुर्यात्सूक्तैर्यथाविधिः
72 तत्र विधिश्चित्रं नामयो घृतकुंभं वसोर्द्धारांपातयेदनलोपरि औदुंबरीमयीं शंवत्सज्जीकोटरवर्जितां
वाहुमात्रां स्रुवं कृत्वा ततस्तं मद्धयोपरि घृतधारां तया सम्यगग्नेरुपरिपातयेत् ॥ अत्र वसोर्द्धाराम
त्राम्रुमकानुवाकाः मंत्रांतराण्यपि श्रूयंते श्रावयेत्सूक्तमाग्नेयं वैश्वदेवं रौद्रमैंद्रवं महावैष्णवं रंसा
मजैवं सामं च पाठयेत् अत्रायं प्रकारः वह्नेरुपरिस्तंभद्वयविधृतां औदुंबरीं स्रुक्प्रमाणां स्रुचं नि
धाय तदुपरि शंखलाविधृतेन निर्मलघृतपूरितेन कुंभेनाधोपवमानछिद्रेण आज्यमंबन्संततम
मग्नेरुपरि वसोर्द्धारांपातयेत् तस्यां पतंत्यामाग्नेयादीनि सूक्तानि श्रावयेत् तद्यथा आग्नेयं अ
ग्निमीळे पुरोहितमित्यादि नवर्चं विष्णोर्नुकमित्यादि षड्र्चं वैश्वदेवं आ ते पितर्मरुतामिति पंचदशा
र्चं रौद्रं स्वादिष्ठयेति दशर्चमैंद्रवं इति ऋग्वेदे अथ यजुर्वेदे सूक्तानि यथा आग्नेयं अस्याचरा
स्त्विति सप्तदशार्चं समास्त्वेति नवर्चं समिधाग्निमिति चतुर्ऋचं एषामन्यतमं वैश्वदेवं पुरुषसूक्तं विष्णोः
कर्माणीति द्वादशर्चं विष्णुरित्याद्याः पंचदश षामन्यतमत् रौद्रं नमस्त इत्याद्यनेकविधं ऐंद्रवं त्वाषाढंजु ७२

न्मुष्टन्नादस्साद्याः चतस्त्रः आप्यायस्वेत्याद्यास्तिस्रो वा महावैश्वानरं साम अत्ताद्यानं वैश्वानरम
त्स्येतिनिस्वरत्यादि यजुर्वेदे अथ सामवेदे महावैश्वानरं साम महावैश्वानरं साम महावैश्वानरा
ख्ये आरण्यके षष्ठे प्रपाठके सामद्वयं जेहसाम तुमद्युम्नं दिव इत्यस्य साम च गीतं ततोन्यान्यपि आ
ग्न्यादिदैवत्यानि स्वशाखासम्म्नातानि पठितव्यानि॥ इति वसोर्द्धारामंत्राः एवं कृत्वा वसोर्द्धारां स्रुचमग्नौ समु
त्क्षिपेत् इति वसोर्द्धाराप्रकरणे अत्र तां स्रुचमत्र प्राप्स्यति पर त्राम्लिम्नंते नेद्द हि द्दाग्नेरसदिति शातप
थी श्रुतिः वसोर्द्धारां जुहोमीदं वर्षोपं चगृहीतमित्यादि हुत्वा स्रुकप्राशनमिति कात्यायनः इति वसोर्द्धारा
प्रकारः॥ अवशिष्टं चयत्कर्म वसोर्द्धाराग्निपातनात् पूर्णपात्रविमोकांतं सर्वं कर्म समापयेत् संस्रवप्रा
शनादि पूर्णपात्रदानांतं कर्म कुर्यात्॥ ततः संस्रवप्राशनं पवित्राभ्यां मार्जनं ओं सुमित्रियान आ
प ओषधयः संतु इति मंत्रेण मार्जयित्वा ओं दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्मः इति मंत्रे
ण प्रणीतोदकमैशान्यां निनयेत् अग्नौ पवित्रप्रतिपत्तिः तत आस्तरणक्रमेण बर्हिः उपाप्याज्येनाभि
घार्य ओं देवा गातुविदो गातुं० स्वाहा इदमग्नये इति बर्हिर्होमं कृत्वा अथवा ओं दिव्याय नभसे स्वाहा इत

नेनवा कर्मापवर्गसमिधः ब्राह्मणोपूर्णपात्रं देशकालसंकीर्त्तनांते गोत्रोऽमुकशर्म्माहं ममाऽमुकका
73 मनयाकृतस्यमहारुद्रजपदशांशहवनसां॰र्थं इदंपूर्णपात्रंसहिरण्यं ब्राह्मन्तुभ्यमहंसंप्रददे तेनक
र्म्मणादेवताः प्रीयंतां ॥ ॥ अथश्रेयसंपादनंकुर्यात् ततोयजमानेछया श्रेयः संपादनंकर्त्तव्यमिति ।
कस्यचिन्मतं उक्तंच एवंकृत्वा वसोर्द्धारांब्राह्मणाऋत्विगादयः श्रेयः संपादनंकुर्युर्जपहोमादिकर्मणः
प्राङ्मुखायोपविष्टायश्रेयोरस्तु उदङ्मुखाः मयातवनियोगेन कृतंहोमजपादिकं तज्जं श्रेयस्तुतत्तुभ्य
महंसंप्रददे धन्ना यज्ञांतंकर्मणांश्रेयस्तेनत्वंपुण्यवान्भवेति ॥ ॥ श्रेयः संपादनंनकर्त्तव्यमितिसां
प्रदायिकाः उक्तंच श्रेयः संपादनंनैकेस्वकृतंकर्मभुज्यते स्वयंयत्रकृतंकर्मतत्फलंभुज्यतेकथंश्रा
द्धंवैश्वानरीयेष्ट्यांदृष्टंतत्सित् पुत्रयोः श्राद्धेपुत्रस्यकर्त्तृत्वंपितुस्तृप्तिः फलंस्मृतं पितुर्वैश्वानरीयेष्ट्यां
कर्त्तृत्वंपुत्रगंफलं तथैवयजमानस्ययाजमानिककर्मणि बहुवक्तव्यमत्रास्तिशास्त्रेविधिनिषेधयोः
न्यत्रास्माभिर्न्नलिखितंग्रंथभूयस्त्वशंकया इति ॥ अथकर्त्तव्यता ॥ ततोदङ्मुखाब्राह्मणाः प्राङ्मु ७३
खोपविष्टाययजमानायश्रेयोरस्तु ॥ ब्राह्मणः हस्तेजलंगृहीत्वा ॐमयानवनियोगेनश्रीमहारुद्रयत्तक

मेणि अंशान्तः कृतानां जपहोमतर्पणमार्ज्जनकर्मणां यज्जातं श्रेयस्तेन त्वं पुण्यवान्भवेति यजमानं
जलौ जलं क्षिपेत्॥ ॥ एवं सर्वैः होतृभिर्जपकर्तृभिः सूक्तपाठकैः पारायणपाठकैः कार्यम्॥ इति श्रेय
संपादनं॥ ॥ अथ होमसंकल्पः॥ यजमानः हस्ते जलं गृहीत्वा॥ अस्मिन्महारुद्राख्ययज्ञे आद्याद्यावा
त्प्रभागादिष्टगणाहुतिपर्यंतं आवृत्तिभिः पृथक् यस्य २ देवस्य येवयेन मंत्रेण यद्यद्द्रव्यं यथाहुतिं यावद्याव
त्संख्याकं तस्य तस्य देवस्य तेन तेन मंत्रेण तत्तद्द्रव्यं तथाहुतं तावत्तावत्संख्याकं ससरेवः प्रीयतां मे वर
दः शांतिरः पुष्टिरो भवतु॥ इति होमसंकल्पः॥ अथ ग्रहप्रीत्यै ग्रहाणां दानानि देयानि आचार्यादीनां
दक्षिणा देया गोवृषवस्त्रपदार्थानां विशेषतो दानं॥ ब्राह्मणभोजनसंकल्पः भूयसीसंकल्पः॥ एवं सं
पूजिताः सर्वैराचार्यप्रमुखाद्विजाः॥ ततः कुंभोदकैः कुर्युर्यजमानाभिषेचनमिति॥ बौद्धायने विशेषः
परिषिच्य ततो वह्निं तत्र याम्यामीश्य चाप्यथा अभिषेकं ततः कुर्यात् मंत्रैस्तल्लिंगकैः शुभैरिति॥ ॥ अ
थाभिषेकः सच तूर्यमंगलघोषकं कर्त्तव्यं॥ वासिष्ठीय शांतौ सविस्तरं द्रष्टव्यं॥ इति अभिषिक्तो यजमानः
परिधानवस्त्राणि आचार्याय प्रदापयेत् स्नात्वा अन्यद्वस्त्रं परिधायाचार्यादीनां दक्षिणां दद्यात्॥

२४

दक्षिणादानात्पूर्वमप्यभिषेकः कार्य इति केचित् इति अभिषेकः ॥ ततः शुक्लाम्बरधरः शुक्लमाल्यानुले
74 पनः सन् शिवं पूजयेत् ॥ पंचोपचारैः षोडशोपचारैर्वा शिवं संपूज्य ॥ चंडबलिं दद्यात् ईशान्यां पूर्ववत् गो
मयोपलिप्तमंडले हृद्गेहेषोद्य मध्यादीशानकोणतः नैवेद्यांशं गृहीत्वा गंधपुष्पाक्षतादिभिरर्चितं कृ
त्वा चंडायैष निर्माल्यबलिं समर्पयामीति बलिं दत्वा हस्तं प्रक्षाल्य ॥ ततोपरं प्रदक्षिणीकृत्य अग्नेप
श्चिमतः उपविश्य ततः कुंडस्थमग्निं प्राचीमनु प्रदिशमिति मंत्रेण प्रणमेत् ॥ पुष्पांजलिं गृहीत्वा इंद्रं देवीरि
त्यादिमंत्रैरग्निं क्षमापयेत् प्रार्थयेत् ॥ भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक कर्मान्तरेपि संप्राप्ते सांनि
ध्यं कुरु सादरं इति स्तुत्वा एषो ह देव० इति मंत्रेणाग्निं पर्युक्ष्य मानस्तोके इति विभूतिं गृहीत्वा त्र्यायुषं ज
मदग्नेरिति ललाटे कश्यपस्य त्र्यायुषमिति ग्रीवायां यद्देवेषु त्र्यायुषमिति दक्षिणांसे तन्नो अस्तु त्र्यायु
षमिति हृदि इति त्र्यायुषकरणं ॥ ततश्चत्वारिशृंगेत्यग्निं गतं रुद्रं ध्यात्वा पंचोपचारैरर्चयेत् वसंतस्य तः० इ ७३
मन ति पूर्णपात्रमग्नौ प्रक्षेपः ॥ शांतिसूक्तपाठः ततो विशेषार्घः ॥ ओं इमा रुद्राय तवसे कपर्दिने० इति मंत्रेण
रुद्रहस्ते विशेषार्घं दत्वा ॥ ततो रुद्रस्तुतिः ॥ अनादिनिधनेति मंत्रपंचम् ॥ पत्र ७२ इति संस्तुत्य देवेशं प्र ७४

णीयतम्विसर्जयेत् ॐ विकिरिद्द विलोहित नमस्तेऽ० इति पराङ्मुखा धर्मकरणपरिवारदेवताः उपसंहार
मुद्रया देवतनौ लीनाः संभाव्य मंडलस्थपुष्पाणि घ्राय देवस्य हस्तहृदंबुजं नीत्वा मनसार्चयेत् ॐ उत्ति
ष्ठ ब्रह्मणस्पते० इति पठित्वा इति देवविसर्जनं यान्तु देवगणाः सर्वे पूजामा० इति देवविसर्जनं यान्तु देवगणाः
सर्वे पूजामा० इति गृहविसर्जनं गच्छत्वं भगवन्नग्ने स्वस्थानं कुंडमध्यतः हव्यमादाय देवेभ्यः शीघ्रं देहि
प्रसीद मे १ [illegible]तु अर्चितोसि मया भक्त्या श्रीयज्ञपुरुष प्रभो अद्य गच्छ निजं स्थानमिह त्वं लौकिकोभ
व १ गच्छ गच्छ सुरश्रेष्ठ० ।। यत्तुर्भिश्च चतुर्भिश्च० ।। इति विसर्जनं ।। अत्र विशेषो वासिष्ठ्यां ज्ञातो द्रष्टव्यः ।।
अथ ब्राह्मणपूजा ।। ब्राह्मणानां ततः पूजा कार्या शास्त्रानुसारतः असंपूर्णं भवेत्तावद्यावद्विप्रो न
पूज्यते १ इति सुगंधादिभिः आचार्यादीन्ब्राह्मणान्संपूज्य ।। पूजिते सति विप्रेन्द्रे सर्वं संपूर्णतां व्र
जेत् ।। ।। अथाच्छिद्रं प्रार्थयेत् व्रतच्छिद्रं तपश्छिद्रमिति वासिष्ठ्यां द्रष्टव्यं ।। ।। अथ ब्राह्मणभोजन
संकल्पः ।। ।। तत्प्रमाणं ।। परशुरामपद्धतौ मंजर्यां च द्रष्टव्यं ।। ।। ततो यजमानः मंडपादि सर्वं सा
र्पयन्निवेदयेत् अद्येमादि० इदं मतिमावितानाद्युपस्करणमंडपादि वपत् तदाचार्याय तुभ्यमहं संप्र

देतत आचम्य विसर्जनं कुर्यात् अथ विष्णुस्तुतिः ॥ ममलक्ष्मीपते: स्वामिन् यज्ञनाथ सनातन
यज्ञेनानेन संतुष्टो भवाखिलमप्यच्युत ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर । यत्पूजितो मया दे
व परिपूर्णं तदस्तु मे २ यस्य स्मृत्या च नामोक्त्येति ॥ १ प्रमादात्कुर्वतां कर्मेति ॥ ततो यजमानोंजलिं बद्ध्वा
ब्राह्मणान्प्रार्थयेत् अद्य पू॰ तिथौ मया यत् कृतं महारुद्रयज्ञाहवनादिकं तन्न्यूनातिरिक्तं यज्ञ
द्ववनात्परिपूर्णमस्तु ॥ ते च परिपूर्णमास्त्विति ब्रूयुः ॥ ततः सानुनयं ब्राह्मणान् विसर्ज्य सुहृदादि
युतः सोत्साहं भुंजीतेति अलं ॥ ॥ इति श्री महारुद्रयज्ञपद्धतिः समाप्तिमगमत् ॥ संवत् १८९७ [redacted]
मिती फाल्गुण वदी व्रहस्पतिवार लिखितं पंधी रामी आत्म श्रुराजी मध्ये ॥ ॥ ॥ राम ॥ कृष्णा